Acc. No. → 50170
सिद्धान्त चन्द्रोदयः
(तर्क संग्रहः टीका)

50170
Acc. No. 50170
सिद्धान्तचन्द्रोदय:
(तर्कसं० टीका)

प्रतानरणानवर्थकयनेनत्वविवरणेतत्र ६

जातो ज्ञातो यद्दुत्वा इतेरदत्तमभिधीयते २

सि॰ चं॰

१

ॐ श्रीगणेशाय नमः ॥ यं वेदाः सततं स्तुवंति नितरां ध्यायंति यं योगिनो यः सृष्ट्यादिनिदानमुत्स
किरणो हग्रीवाणां वः पुमान् । तस्मिन्नीलसुताकृताद्धवपुषिप्रस्तावात्मके ऽंगाकरे मे चित्तं र
मतां सदाभयहरे श्रीमत्परब्रह्मणि ॥ १ ॥ चित्रामानवपसागरे हिमरुचौ विद्वन्मणेः श्रीगुरोः काशी
नाथप्रभुनामिधानलसतः कारुण्यबोधांबुधेः स्वांतः प्रांतगतांधकारतरणिं श्रीपादपंके
रुहद्वंद्वं संकलयामि हृद्यममलं प्रत्यक्षदेवं शिवं ॥ २ ॥ ज्ञात्वा तं ममनेकं श्रीकृष्णधूर्जटिदीक्षि
तः तर्कसंग्रहगूढार्थान् विवृणोमि यथामति ॥ ३ ॥ श्रीमद्विक्रमपत्तनाधिपमहाराजाधिराजाभि-
तप्रजश्रीगजसिंहभूपतनयश्रीराजसिंहप्रभोः सुज्ञानाय विनिर्मितोतिललितः सिद्धांतचंद्रोदयो र
म्यः साधु तनोतु पंडितमनोहर्षांतरंगावलिं ॥ ४ ॥ ग्रंथादौ निर्विघ्नपरिसमाप्त्यर्थं मन्नंभट्टोपाध्यायः शि
ष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं नमस्कारात्मकं मंगलमाचरन् श्रोतृप्रवृत्तये ऽनुबंधचतुष्टयं
च प्रदर्शयन् शिष्याणामवधानाय चिकीर्षितग्रंथप्रतिज्ञां च कुर्वन् शिष्याणां मंगलप्रवृत्तये आ
स्तिकमार्गप्रवृत्तये वा तन्निबध्नाति निधायेत्यादिना । तर्क्यंते प्रमितिविषयीक्रियंते इति तर्काः द्र
व्यादिपदार्थास्तेषां संग्रहः संक्षेपेणोद्देशलक्षणपरीक्षा यस्मिन् सः ग्रंथः क्रियते इत्यर्थः ना

नाम ४

चित्रामशतिक सचितनामेद मनः ४

इयज्ञानचक्रि तत्वमभितं

शिव ६

तर्कसंग्रहपदवाच्यता... कोदिप्रवेशात्तनिबंधनत्वं २

नामानेन वस्तुसंकीर्त्तनमुद्देशः यथा द्रव्यगुणादिति असाधारणधर्मो लक्षणं यथा गंधवत्त्वं पृथिव्याः
लक्षितस्य लक्षणं संभवति न वेति विचारः परीक्षा तत्र तु संग्रहे तस्य संक्षेपेण स्वरूपकथनमिति
व्याख्यानं तन्न स्वरूपकथनमात्रेण पदार्थतत्वज्ञानासंभवात् नन्वेतद्ग्रंथरचनावलंबनं कीदृश ६
प्रयोजनायेत्यत आह सुखबोधायेति सुखेनानायासेन बोधाय पदार्थतत्वज्ञानायेत्यर्थः तथा
च त्रिविधा चास्य शास्त्रस्य प्रवृत्तिरुद्देशो लक्षणं परीक्षा चेति भाष्यं तं मत्वा च उद्देशादेस्सकलात
दार्थतत्वज्ञानं भवत्येवेति भावः अत्रोद्देशस्य पदार्थज्ञानं प्रयोजनं लक्षणस्येतरभेदरूपं य
त्साध्यं तद्ज्ञानमिति वदंति परीक्षायास्तु लक्षणाहेतुभूतपक्षलक्षणांतरदोषपरिहार एवेति मंत
व्यम् ननु कुसुमांजलिलीलावत्यादिग्रंथाध्ययनेनापि पदार्थतत्वज्ञानसंभवे किमानेन ग्रंथर
चनावलंबनेनेत्यत आह बालानामिति तथा च तेषामतिदुर्बोधकत्वात्तत्र बालानां बोधो न भ
वतीति भावः अत्राधीतव्याकरणकाव्यकोशाध्यनेकारोऽनधीतन्यायशास्त्रो बालः नन्वाशीर्वाद
नमस्कारवस्तुनिर्देशभेदतः मंगलं त्रिविधं प्रोक्तं शास्त्रादीनां मुखादिष्विति महदुक्ते मंग
लस्य ग्रंथादावावश्यकत्वात्तदभावात्कथं ग्रंथः कृत इत्यत आह निधायेति विश्वेशं जगत्

ननु समाप्तिप्रतिदृढतरसामग्रीसंपादनाय बहुतरमंगलमेव स्यादन्यथा ह ५

सी. टी.

२

नीरं श्रीसांबमूर्त्तिं हृदि मनसि निधाय ध्यात्वा गुरुवंदनं च विधायेत्यर्थः तथा चात्र नमस्कारात्मकं
मंगलं कृतमेवेत्याशयः न चेश्वरमंगलेनैव समाप्तिनिर्वाहे गुरुवंदनमयुक्तमिति वाच्यम् शिवे रुष्टे
गुरुस्त्राता गुरौ रुष्टे न कश्चन गुरुरेव परं ब्रह्मेत्यादिवचनात् गुरोरेवोत्कृष्टत्वप्रतिपादनेन तस्यैवा
वश्यकत्वात् ईश्वरमंगलं तु समाप्तेर्दृढतरसामग्रीसंपादनाय निरीश्वरवादिमतनिराकरणा
यवेति बोध्यं यत्र चेश्वरमंगलमेवास्ति तत्र तस्यैव प्राधान्यं दिवाकरदीधितेरभावे दीपदीधितेश्चा
रूपोत्पादकत्ववदिति भावः इति श्लोकव्याख्या अथ मंगलं समाप्तिं प्रति न कारणं कादंबर्यादौ मं
गलसत्वेपि समाप्त्यनुदयात् नास्तिकग्रंथे च मंगलाभावेपि समाप्त्युदयादन्वयव्यतिरेकव्यभिचा
रादिति चेन्न यत्सत्वे यत्सत्ता तरयावत्कारणसत्वं यत्सत्वमित्यस्यैवान्वयत्वेन कादंबर्यादौ मंगलसत्वे
पि कारणांतरस्यासत्वकुत्वेनेनान्वयव्यभिचाराभावात् नास्तिकग्रंथे च कार्यात् कारणमनु
मेयमिति न्यायेनायं नास्तिकः कृतमंगलकः विघ्नध्वंसपूर्वकग्रंथपरिसमाप्तिमत्वात् चैत्रवदि
त्यनुमानाज्जन्मांतरीयमंगलसिद्धौ व्यतिरेकव्यभिचाराभावाच्च ननु मंगलस्य श्रुतिबोधितक
र्तव्यताकत्वे किं मानमिति चेन्मंगलं श्रुतिबोधितकर्तव्यताकं अलौकिकशिष्टाचारविषयत्वा
त् दर्शादिवदित्यनुमानमेव मानं लौकिके व्यभिचारवारणायालौकिकेत्याचारविशेषणं आचारत्वे

नास्तिके विघ्न काभावादिः ५

या परं तु विषयत्वसान्निध्यात्स्फूर्तिरेव विवक्षिता उन्मत्तकृततरादिश्राद्धादौ हेतोः सत्वाद्व्यभिचारोऽतः
शिष्टेति शिष्टत्वं च भक्तिश्रद्धादिमत्त्वं वेदानुमतकर्मकर्तृत्वं श्राद्धिकाभासे व्यभिचारवारणाय
भक्तीत्यादि चेत्संवेदनप्रवृत्तचौर्यादौ व्यभिचारवारणाय वेदानुमतेति भक्तिश्चाराध्यत्वेन ज्ञानं
श्रद्धा च फलावश्यंभावनिश्चय इति संक्षेपः नव्यास्तु मंगलस्य विघ्नध्वंस एव फलं समाप्ति
स्तु प्रतिबन्धकाभावघटितकारणात्समुदायादेवेत्याहुः इत्यलमतिविस्तरेण बालानाम् इति मं
गलवादः तत्रोद्देशस्यैवादौ कर्तव्यतया तत्पुरस्कारेण पदार्थान्विभजते द्रव्येति द्रव्यगुणकर्मसामा
न्यविशेषसमवायाभावाः सप्त पदार्थाः ज्ञेयत्वादिकं पदार्थसामान्यलक्षणं सप्तग्रहणं स्पष्टार्थ
मेवमग्रेऽपि इति पदार्थसामान्यलक्षणं द्रव्यं विभजते तत्रेति तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाश
कालदिगात्ममनांसि नवैव तत्र सप्तपदार्थमध्ये इत्यर्थः नवैवेति द्रव्याणि नवैवेत्यन्वयः एवं तत्रेति प
दं चतुर्विंशतिर्गुणा इत्यादिनाप्यन्वेति द्रव्यत्वजातिमत्त्वं गुणवत्त्वं समवायिकारणत्वं वा द्रव्यसामान्य
लक्षणं द्रव्यत्वजातौ विदं द्रव्यमिति प्रसक्तं द्रव्यवृत्तिर्या समवायिकारणता सा किंचिद्धर्माव
च्छिन्ना कारणतात्वात् दंडवृत्तिकारणतावदित्यनुमानं वा मानं तादृशधर्मविधया द्रव्यत्व

बुद्धिपूर्वतिमादि [illegible] तेय

द्वितीयलक्षणमाह कालिकसंबन्धेन गुणस्यापि गुणवत्त्वसत्त्वात् अतएव समवायेदत्तं गौरवमतः तृतीयलक्षणमाह
प्रथमलक्षणेऽल्पत्वाव[illegible] लक्षणयोरैक्यात् [illegible] ति २

तेन द्रव्ये निर्गुणं तिष्ठतीति नियमात् २

गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वं द्रव्यलक्षणं रूपादावतिव्याप्तं एकं रूपं रसात् पृथगिति प्रतीत्या गुणे कत्वपृथक्त्वेन तत्समानाधिकरणं तत्रवर्तमाना या सत्ताभिन्नजातिः रूपत्वजातिनह्यानरूपे १

द्र॰ टी॰ ३

जातिसिद्धेः नन्वाद्यक्षणे द्रव्यस्य निर्गुणत्वेन कथं गुणवत्त्वं तल्लक्षणं नचैतदानीं गुणस्तत्त्वेऽसंभवति तत्पूर्व
घटरूपसमवायिकारणत्वात् सामान्यस्यानङ्गीकारे तु घटगुणयोर्भेदो न स्यात् कारणभेदस्यैव
कार्यभेदनियामकत्वादिति चेन्नैवं गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वस्य विवक्षितत्वात्
सत्तामादाय गुणादावतिव्याप्तिवारणाय सत्त्वेत्यादि गुणत्वादिकमादाय पुनस्तत्रैवातिव्याप्तिवारणा
य गुणेत्यादि एवमपि घटत्वादिकमादाय घटादावतिव्याप्तिवारणाय सत्तासाक्षाद्व्याप्येत्यस्या
पि द्रव्यलक्षणे प्रवेशः कार्यः तथाच गुणसमानाधिकरणसत्ताभिन्नसत्तासाक्षाद्व्याप्यजाति
मत्त्वं द्रव्यलक्षणं एकं रूपं रसात् पृथगिति प्रतीतिस्तु न समवायेन रूपे पृथक्त्वमेकत्वं चावगाहते गु
णे गुणानङ्गीकारात् किन्तु घटनिष्ठमेव ते समानाधिकरण्यसंबन्धेन रूपे अतस्तत्र नातिव्याप्तिरिति
मन्तव्यं नवत्वमेव व्युत्पादयति पृथिवीति अथ तमोवादः ननु इहान्धकार इति प्रतीतेस्तमसः
प्रसिद्धत्वेन नीलं तमश्चलतीति प्रतीतेस्तमसो गुणक्रियावत्त्वेन च द्रव्यत्वसिद्धेः स्पर्शरहितत्वेऽप
ति रूपवत्त्वेन न पृथिव्यादावन्तर्भावोऽपि तस्य तदुक्तं तमः खलु चलं नीलं परापरविभागवत् प्रसि
द्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हतीति अतः कथं नवैवेति चेन्न तमसो द्रव्यत्वे आलोकसहकृतेनैव च

इदं तमः आकाशादिचतुष्टये अन्तर्भवितुं नार्हति रूपवत्त्वात् यच्चैवं तच्चैवं इदं तमः पृथिव्यादिचतुष्टये अन्त

तम: ... दिप्रतीतौ द्रव्यत्वे स्यात्तस्यतानतिनचचाक्षुषप्रतीतिर्भ्रांतित्वं ... यथा शुक्तौ इदं रजतमिति नेदं रजतमिति ...
... त्वं तदा उत्तरकाले बाधकज्ञानाभावान्न भ्रांतित्वमित्यत आह किंचेति ६

चक्षुरिंद्रियेण ग्रहणं स्यात् द्रव्यचाक्षुषप्रत्यक्षे प्रकाशकालोकसहकृतचक्षुरिंद्रियस्यैव कारणत्वात् अथ
घूकादीनामालोकमंतरेण कथं चाक्षुषमिति चेन्न अदृष्टविशेषोपगृहीतघूकादींद्रियस्यानुत्क
ष्टालोकं एव सहकारीति कल्पनात् विलक्षणादृष्टवशात्कचिदनुत्कृष्टालोकस्यापि सहका
रित्वे बाधकाभावात् यद्वाऽस्मदीयत्वेन द्रव्यचाक्षुषविशेषणात् न च दृष्टावच्छेदेनालोकसंयो
गस्य त्वेऽस्यावच्छेदेन कुतो न घटादिचाक्षुषमिति वाच्यम् आलोकसंयोगावच्छिन्नचक्षुःसंयोग
एव चाक्षुषनिदानमित्यस्मदभिप्रायात् किंचातिरिक्ततमःकल्पने तत्प्रागभावादिकल्पने च गौरव
मेवाधिकमवशिष्यते तस्मात्प्रौढप्रकाशक तेजःसामान्याभाव एव तमः य किंचित्तेजोभाववं
तितम आपत्ता सामान्यपदं सुवर्णवति देशेंधकाराभावापत्त्या प्रकाशकपदं अणुकादिमत्यं
धकाराभावापत्त्या प्रौढपदं नीलं तमः चलतीति प्रतीतिर्भ्रमः उष्णस्पर्शस्यापत्त्यापि तु मशीका
लांतमोऽभावो न तेज इति बोध्यम् इति द्रव्यसामान्यनिरूपणं गुणान्विभजते रूपेति रूपरसग
न्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुः
खेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिगुणाः तत्रेत्यनुवर्त्तते गुणत्वजातिमत्त्वमानं पूर्ववत्

तदिह घूकादीनामधतम सेवाचाक्षुषेन स्यात् अतस्त्र हु ८

यत्किंचिन्मणीजोदीनादिदभावत्वेति वस्तु ७

द्रव्यकर्मभिन्नत्वे सामान्यव ... वत्वे निष्कारणत्वात्सिद्धिः ... नेबोध्यम् ९

ऽत्रादौ गुणग्रहणाकरणो द्रव्येवनियामकाइतिज्ञेयं द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः द्रव्य कर्मणोरति
व्याप्तिवारणाय विशेष्यदलं सामान्यादावतिव्याप्तिवारणाय विशेष्यदलम् चतुर्विंशति गुणाइति ज्ञेयं
रूपरसगंधस्पर्शाः संख्यापरिमाणपृथक्त्वसंयोगविभागौ परत्वापरत्वबुद्धयः सुखदुःखेच्छाद्वेषप्रय
त्नाश्चेति वैशेषिक सूत्रस्य चकारस्यानुक्त समुच्चयपरत्वापकत्वान्नततविरोधइतिबोध्यम् लघुत्वस्य गु
रुत्वाभावरूपत्वादालस्य कुसमावरूपत्वान्न चतुर्विंशतित्वव्याघातः इति गुणसामान्यनिरूपणम्
कर्मविभजते उत्क्षेपणेति उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानि पंचकर्माणि कर्मत्वजातिः प्र
त्यक्षसिद्धा संयोगाभिन्नत्वे सति संयोगासमवायिकारणम् कर्म संयोगाभिन्नत्वं घटपटादावव्याप्त
तउक्तम् संयोगासमवायिकारणमिति कायपुस्तकसंयोगस्यासमवायिकारणं हस्तपुस्तकसं
योगस्तत्रातिव्याप्तिवारणाय सत्यंतं भ्रमणादीनां गमनेंतर्भावं वदिष्यतीति न पंचत्वविरोधः इति क
र्मसामान्यनिरूपणम् सामान्यं विभजते परमिति परमपरं चेति द्विविधं सामान्यम् परसामान्यमपर
सामान्यमित्यर्थः परत्वं चाधिकदेशवृत्तित्वं द्रव्यादित्रिकं सदिति गद्यते सतो भावः सत्तेति व्युत्पत्ते सत्तेत्र ... [illegible]
तानामकाचनजातिरस्ति साच द्रव्यत्वा ... धिकरणद्रव्ये वर्तमानासत्ताधिक ... देशे गुणादावपि वर्त्तते

धेरस्वाभाविकत्वात् १

अतः परसामान्यमित्युच्यते अपरत्वं चन्यूनदेशवृत्तित्वं वर्त्तते च द्रव्यत्वे गुणादिसाधारणसत्ताधिकरण

गुणादेर्न्यूनदेशो द्रव्यं तद्वृत्तित्वात् अथैवं सति द्रव्यत्वस्य पृथिवीत्वापेक्षया परत्वात् परं सत्तेति वक्ष्य

माणं अंशासंगतिरिति चेन्न सकलजात्यपेक्षयापरत्वाभिप्रायकत्वात् तस्य सामान्यत्वादिकं न जातिः किं

तूपाधिरेव ननूपाधिरिति को वा ह्रियते इति चेत् उच्यते यद्यपि धर्ममात्रमुपाधिरित्युच्यते तथापि जाति

भिन्नो धर्म एवात्र विवक्षितः स द्विविधः सखंडोपाधिरखंडोपाधिश्च तत्राद्यो बहुपदार्थघटितो ध

र्मः स च धर्मः बहुपदार्थघटितमूर्तः यथा उत्कारिष्टत्वादिकं वक्ष्यमाणाभावत्वाभावत्वशरीरत्वेंद्रियत्व

विषयत्वकारणत्वकार्यत्वाकाशत्वकालत्वदिक्त्वादयश्च द्वितीयोऽनिर्वचनीयो धर्मः इति बोध्य

म् मूलकारोक्तसामान्यलक्षणं प्रसंगादत्रैव प्रकाश्यते नित्यमेकमनेकानुगतं सामान्यमिति अत्रैकत्व

मपि कालत्वे दान्येतस्मिन्नित्य लिंगप्रत्यय...ि ... सामान्यमनेकानेकेषु एकत्वाभावात् अनेकत्वस्यैकाभिन्नत्वा

संभवात् ततः न च तल्लक्षणं संभवति घटत्वपटत्वाद्यनेकेषु एकत्वाभावात् अनेकत्वस्यैकाभिन्नत्वाल

क्षणेनेकत्वानेकत्वयोर्विरोधात् यद्वा तच्च सजातीयधर्मान्तरराहित्यरूपम् अथवा एकमितिस्वरू

पकथनं अनेकानुगतत्वं चानेकेषु वृत्तित्वं तदपि समवायेन बोध्यम् तेन नात्यंताभावे तिव्याप्तिः त

स्याभावीयदैशिकविशेषणतासंबंधेन वृत्तेः इदं च संयोगादावप्यत्यत उक्तम् नित्यमिति गगनपरिमाणादि

घटत्वरूपसामान्यस्यैकत्वात् कोदोषः इति वाच्यं प्रकटयति तेः ...

सामान्यलक्षणेऽनेकमिति ...

आकाशनिष्ठायाः समवायिकारणतायाः किंचिद्धर्मावच्छिन्ना कारणतात्वात् वायुनिष्ठकारणतावदित्यनुमानेन तादृशधर्मविषयः सिद्ध्यति ६

कारणापानेकेति इति सामान्यनिरूपणम् विशेषं विभजते नित्येति नित्यद्रव्यवृत्तयो विशेषास्तु मताः एवं स्वतो व्यावर्तकत्वं विशेषत्वं अयं विशेषो द्रव्यादिभिन्नो विशेषात् इत्यत्र स्वयमेव व्यावर्तको भवतीति लक्षणसमन्वयः व्यावर्तकत्वं नाम व्यावृत्तिजनकत्वं व्यावृत्तिश्चेतरभेद तद्ज्ञानं चेदमन्यत्रैवेति स्फुटेतरं ननु विशेषं एव किमर्थमाश्रयितव्य इति चेच्छृणु घटादीनां कपालसमवेतत्वादिकं पटादिभेदकमस्ति परमाणूनां तु परस्परभेदकं विशेषं विना न किंचिदस्ति तेनापत्या विशेष आश्रयितव्यः एवं शब्दसमवायिकारणतावच्छेदकतयापि विशेषः सिद्ध्यति अत्रानुमानं पूर्ववत् कारणत्वलिंगकं आकाशत्वं शब्दसमवायिकारणत्वे वच्छेदकत्वादिकमवच्छेदकमिति स्वतो व्यावर्तनार्थमेव वासौ गी कार्यः नित्यद्रव्यवृत्तय इत्याश्रयकथनं इति विशेषनिरूपणम् समवायस्यैकविधत्वादाह समवायस्त्विति समवायस्त्वेक एव नित्यः संबंधः समवायः संयोगवारणाय नित्य इति गगनादिवारणाय संबंध इति संबंधश्च संबंधिभिन्नत्वे सति संबंध्याश्रितः स्वभिन्नसंबंध्याश्रितः स्वभिन्नप्रतियोगिकः संबंधव्यवहारहेतुर्वा भवति घटघटत्वयोः समवायः स्वाभिन्नयत्संबंधि घटो घटत्वं च तदाश्रितः अभावाद्यात्मकस्वरूपसंबंधादिवारणाय भिन्नत्वनिविष्टं स्वरूपसंबंधपरंपरासंबंधव्यवहारस्य गौणत्वे न तत्र संबंधलक्षणस्यानपेक्षितत्वात् संयोगसमवायाविव मुख्यसंबंधौ

संबंधं विना न भवतः ते न तत्समानमपः

विषयताद्विविधाविशेष्यतानिरूपितविशेष्यतानिरूपितविषयता सामान्यकविशेषः ।

ननुसमवायसद्भावेकिंमानमितिचेदत्रप्राचः इहकपालेघटसमवायइतिप्रत्यक्षमितिजगदिरे नव्यास्तुइह
तलेघटसंयुक्तमितिवद्भूतलेघटसंयुक्तमितिप्रत्यक्षानुदयात्संबंधप्रत्यक्षेयावदाश्रयप्रत्यक्षस्यहेतुत्वेन
समवायेनप्रत्यक्षः तस्यातीन्द्रियसाधारणत्वात् किंत्वनुमेयः तथाहिविशिष्टरूपवान्घटइतिप्रत्यक्षंहिविशि
ष्टज्ञानंतत्रकिंचित्प्रकारकंकिंचिद्विशेष्यकंकिंचित्संसर्गकंचेतिसर्वजनसिद्धं एवंसतिरूपवान्घट
इतिविशिष्टज्ञानंविशेषणविशेष्यसंबंधविषयकं विशिष्टज्ञानत्वात् दंडीतिविशिष्टज्ञानवदित्यनुमा
नात् द्रव्ययोरेवसंयोगइतिनियमेनसंयोगस्यबाधात्समवायसिद्धिरित्याहुः प्रकारत्वंनामविषयतावि
शेषः एवं [illegible] विशेष्यत्वमपि प्रकारत्वंनामभासमानवैशिष्ट्यप्रतियोगित्वं विशेष्यत्वंनाम भास
मानवैशिष्ट्यानुयोगित्वं वैशिष्ट्यंनामसंबंधः दंडीतिज्ञाने [illegible] भासमानवैशिष्ट्यंसंयोगस्तत्प्रतियोगि
त्वंदंडे तदनुयोगित्वंपुरुषेइत्यपिकेचित् अत्रमीमांसकाः समवायस्थानेस्वरूपसंबंधःएवनिविश्य
तेइत्याहुः तदसत् रूपाद्यात्मकानंतस्वरूपाणांसंबंधत्वेगौरवात् नचसमवायस्यैकत्वेरूपवान्वायुरि
तिप्रतीत्यापत्तिः स्पर्शसमवायस्यरूपसमवायस्यचैक्यादितिवाच्यम् रूपविशिष्टसमवायाधिकर
णतायाएवाद्यप्रतीतिनियामकत्वात्वायावभावादितिसंक्षेपः इतिसमवायनिरूपणं अभावंविभज

अतीन्द्रियपदपरमाणुवत्तुल्य

न

केचित्तु

निरूपकत्वे

आम्रव त्वे

केचिदित्यनेन [illegible] भासमानवैशिष्ट्यप्रतियोग्यनुयोगित्वतत्तत्प्रकारतत्वयोर्विशेषणविशेष्यभावाभावः ४

सि० टी

६

वोऽन्योन्याभावे १

भावत्वाभावप्रतिभावभिन्नत्वे ... तुल्यत्वादिति १

ते अभाव इति अभावश्चतुर्विधः प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति भावभिन्नत्वं भावत्वाभावः
प्रतियोगिज्ञानाधीनज्ञानविषयत्वं वाऽभावत्वं अत्र रवण्डोपाधिरित्यपि केचित् भावत्वं च समवायि
कार्यसमवायान्यतरसंबन्धेन सत्तावत्वम् तदर्थश्च समवायसंबन्धेन द्रव्यादित्रिके समवायसंब
न्धेन यदेकाधिकरणत्वं तेन संबन्धेन सामान्यादित्रिके सत्तावत्वं अत एव गुरवः अभावोऽधिकरणात्म
क इत्यूचुस्तन्न जलगतगन्धाभावस्य जलस्वरूपतया गन्धाभावस्य घ्राणजत्वानुपपत्तेः जलस्य घ्राण
जत्वायोगादिति दिक् एवमाधाराधेयभावोऽप्युपपद्यते इत्यभावसामान्यनिरूपणम् अथ पदार्था
नां साधर्म्यवैधर्म्ये निरूप्येते सप्तानां ज्ञेयत्वादिकं साधर्म्यं तच्च प्रागुक्तमेव द्रव्यादिचतुर्णां समवेतत्वं
[illegible] द्रव्यादिषण्णामभावत्वम् द्रव्यादिपंचानामभावत्वे सत्यनेकत्वं समवाय
संबन्धित्वं च द्रव्यादिचतुर्णां समवेतसमवेतत्वम् द्रव्यादित्रयाणां सत्तावत्त्वं द्रव्यगुणयोर्नित्या
नित्योभयवृत्तिसत्ताभिन्नजातिमत्त्वं कर्मावृत्तिजातिमत्त्वं वा गुणकर्मणोरसमवायिकारणत्वं
गुणादिषण्णां गुणकर्मशून्यत्वं सामान्यादिचतुष्टयस्य सामान्यशून्यत्वं [illegible] येषां यत्साध
र्म्यं तदितरेषां केवलान्वयिभिन्नं तद्वैधर्म्यमिति ध्येयम् इति श्रीसिद्धान्तचन्द्रोदये तर्कसंग्रहव्या

अधिकरणाद्भावे ... [illegible]

... तेऽशक्यते तत्र रवण्डोपाधिकत्वं २

ख्याने पदार्थोद्देशविभागनिरूपणं नाम प्रथमः परिच्छेदः १ पदार्थान्विभज्य संप्रति तेषामुद्देशक्रमानु
सारेण लक्षणं वक्तुमुपक्रमते गंधवतीति गंधवती पृथिवी गंधवत्त्वं च समवायेन बोध्यम् तेन का
लिके संबंधेन काले दैशिकसंबंधेन दिशि गंधवत्त्वस्य सत्त्वेऽपि न क्षतिः तयोस्तेन तेन संबंधेन
वस्तुसर्वाधारत्वात् अथ तदेव हि लक्षणं यदव्याप्त्यतिव्याप्त्यसंभवरूपदोषत्रयशून्यम् य
था गोः सास्नादिमत्त्वं अव्याप्तिश्च लक्ष्यैकदेशावृत्तित्वं अतएव गोर्नकपिलत्वं लक्षणं तस्याव्या
प्तिग्रस्तत्वात् अतिव्याप्तिश्च लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वं अतएव गोर्न शृंगित्वं लक्षणं तस्याति
व्याप्तिग्रस्तत्वात् असंभवश्च लक्ष्यमात्रावृत्तित्वं यथा गोरेकशफत्वं न लक्षणमसंभवग्रस्त
त्वात् एवं गंधत्वस्य लक्ष्यैकदेशपाषाणमणिमुक्ताहीरकादाववृत्तिरूपाव्याप्तिग्रस्तत्वात्कथं लक्ष
णत्वमिति चेन्न तद्भस्मनि गंधोपलंभेन तत्रापि गंधकल्पनात् तस्यानुद्भूतत्वादनुपलब्धिः
अनुद्भूतत्वं जातिस्तदभाव उद्भूतत्वमिति गंगेशोपाध्यायाः उद्भूतत्वं जातिस्तदभावोऽनुद्भू
तत्वमिति जरन्नैयायिकाः तदुभयमपि संकरस्य जातिबाधकत्वप्रदर्शनेन साधीयः [illegible]

...नोपादेयं भवति पाषाणादिभस्मजन्यत्वात् यत्तद्द्रव्यं यत्तद्द्रव्य
भस्मपरमाणवो गंधवंतः गंधवद्भस्मारंभकत्वात् ...
...भस्मजन्यभवति...

तद्देशे तत्संबंधाभावाद्गंधप्रतीत्यनुपपत्तिः न च वायवानीततत्कणकादिसंबंधोऽस्त्येवेति वाच्यम् कस्तूर्य्याः न्यून
तापत्तेः कुसुमस्य च छिद्रतापत्तेरिति चेन्न भोक्तृदृष्टविशेषेण पूर्ववत्तस्याः कणांतराद्युत्पत्तेः कर्पूरादौ वद
दृष्टविशेषाभावात् न्यूनतेष्टैव इति पृथिवीनिरूपणम् ननु लक्षणस्य किं लक्षणमिति चेत् लक्ष्यतावच्छेद
कसमनियतत्वमित्यवेहि अत्र पृथिवी लक्ष्या तद्वृत्तिलक्ष्यतायाः अवच्छेदकं पृथिवीत्वं तत्समनियतत्वस्य गं
धवत्त्वे इति लक्षणसमन्वयः अवच्छेदकत्वं च स्वरूपसंबंधविशेषः अन्यूनानतिरिक्तवृत्तित्वमित्यपि के
चित् समनियतत्वं च तद्व्याप्यत्वे सति तद्व्यापकत्वं वर्तते च गंधवत्त्वे यत्र गंधवत्त्वं तत्र पृथिवीत्वमि
ति तद्व्याप्यत्वं यत्र पृथिवीत्वं तत्र गंधवत्त्वमिति तद्व्यापकत्वं च यस्य च प्रथममुपादानं तद्व्याप्यमि
ति मंतव्यं यस्य पश्चात् उपादानं तद्व्यापकम् तदुक्तं व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परं एवं प
रिच्छिन्ना व्याप्तिः स्फुटी भवति तत्त्वत इति ननु लक्षणस्य किं प्रयोजनमिति चेत् इतरभेदज्ञानमिति वि
द्धि न चैवं सतीतरभेदात्मिकायाः व्यावृत्तेः तस्या अपि पृथिव्यसाधारणधर्मत्वेन सापि लक्षणमिति
वक्तव्यम् एवं सति पृथिवीतरभेदवती इतरभेदादित्यनुमानासंभवेन तस्याः प्रयोजनाप्रसिद्धिः ॥

नहि पृथ्वीलक्ष्यत्वादिकं पृथ्वीत्वव्याप्यवच्छेदकं न्यूनातिरिक्तदेशवृत्तित्वात् ।

अन्यूनवृत्तित्वं नाम सर्वदेशवृत्तित्वमित्यर्थः ॥

इति श्रीवत्स[illegible]ते

एतादृशे ल[illegible] [illegible]तिर न त्वेवं [illegible]

टिप्पणी जगन्नीमपदार्थैरितरस्यो भिद्यते ज्ञेयत्वात्

८

वं जगदितरस्यैवाप्रसिद्ध्या तल्लक्षणीभूतज्ञेयत्वस्यापीति चेत् सत्यं असाधारणधर्मो द्विविधः व्यावर्त्तको
ऽव्यावर्त्तकश्च तत्र व्यावर्त्तकरूपासाधारणधर्मस्यैव लक्षणत्वात् तस्य च व्यावृत्तिरूपप्रयोजनं दर्शित
मेव अ[illegible]र्थैवं सति लक्षणलक्षणस्याव्यावर्त्तकेतिव्याप्तिः व्यावृत्तेः पृथिवीत्वसमनियतत्वात् ज्ञेय
त्वस्य च पदार्थत्वसमनियतत्वात् इति चेन्नैवं तद्भिन्नत्वस्यापि लक्षणे निवेशात् तथा च लक्ष्यताव
च्छेदकसमनियतत्वे सति ज्ञेयत्वादिभिन्नत्वं लक्षणमिति पर्यवसन्नम् तस्मिन् स्वभेदानङ्गीका
रेण ज्ञेयत्वादौ ज्ञेयत्वादिभिन्नत्वस्यासंभवात् यदि चासाधारणधर्ममात्रं लक्षणमिति सिद्धान्तव्या
घातः एवं ज्ञेयत्वादिकं पदार्थसामान्यलक्षणमिति पूर्वोक्तमप्यसंगतमित्याशंक्येत तदा त्वसाधार
णधर्ममात्रं लक्षणं तस्य च व्यावृत्तिवदिदं पृथिवीदं जगदिति व्यवहारोपि प्रयोजनमिति मंतव्यं त
दुक्तं व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनमिति इतःपरं प्रयोजनाभावाज्ज्ञेयत्वादि[illegible]भिन्नत्व
मनुपादेयमेव इति लक्षणलक्षणनिरूपणम् पृथिवीं विभजते सेति सा द्विधा द्वैविध्यं व्यु
त्पादयति नित्येति नित्या अनित्या च नित्या परमाणुरूपा अनित्या कार्यरूपा नित्यत्वं [illegible]ध्वंससिन्न

अव्यावर्त्तके ज्ञेयत्वादिके

गदुंत जालांतरगते भानौ यत्सूक्ष्मं दृश्यते रजः तस्य षष्ठतमो भागः परमाणुः स उच्यते ८

त्वेसति ध्वंसाप्रतियोगित्वं अनित्यत्वं च ध्वंसप्रतियोगित्वं परमाणुरूपेति ननु परमाणुसद्भावे किं मान
मिति चेदुच्यते गवाक्षांतरघ्नेतररश्मिकिरणस्थं सर्वतः सूक्ष्मं यद्रज उपलभ्यते तत्त्र्यणुकमित्यभिधीयते तत्
त्र्यणुकं सावयवजन्यं चाक्षुषद्रव्यत्वात्पटवदित्यनुमानेन त्र्यणुकावयवः सिध्यति स एव द्व्यणुकः सोऽप्यव
यवजन्यः महदारंभकत्वात् कपालवदित्यनुमानेन तदवयवः सिध्यति स एव परमाणुरित्युच्यते अनव
स्थाभयाच्चावयवधारा नोररीक्रियते अन्यथा मेरुसर्षपयोरपि साम्यप्रसंगः परमाणोरनित्यत्वे विनाशमदा
त्रिकारणाभावे कार्योत्पत्तिप्रसंगः ननु त्रिभिः परमाणुभिः कुतो न द्व्यणुकं नारभ्यते द्व्यणुकद्वयेन कुतो त्र्यणुकं न
मिति चेन्न परमाणुत्रयसंयोगस्य द्व्यणुकद्वयसंयोगस्य च द्रव्यानारंभकत्वकल्पनात् किंच प्रथमस्य
द्रव्यारंभकत्वे च गौरवं स्यात् द्वितीयस्य च तथात्वे त्र्यणुकमहत्त्वानुपपत्तिः स्यात् कार्यमहत्त्वे कारणमहत्त्वस्य
कारणबहुत्वस्य वा कारणत्वात् इति परमाणुप्रमाणप्रदर्शनं कार्यरूपेति अवयविनी चेत्यपि बोध्यं अ
वयविनास्तिकाः अवयविसद्भावे न मानं अयं घट इति प्रतीतिर्हि परमाणुपुंजे एवोपपद्यते इति चेतन्न परमा
णूनामतींद्रियत्वेन घटस्याप्यतींद्रियत्वापत्तेः न चैकस्य केशस्य दूरे अप्रत्यक्षत्वेन कथं तर्हि तत्समुह
स्य प्रत्यक्षत्वमिति वाच्यम् सन्निधाने एकस्यापि केशस्य प्रत्यक्षत्वसंभवेन दृष्टांतवैषम्यात् किंच अ

अवयविनी नाम
अवयवजन्यत्वं
पृथिवीत्वे ५

यद्यद्घट इति ज्ञानविषयतायामनंतपरमाणुकल्पने गौरवाच्चेति सारम् इति परमाणुपुंजवादनिरासः पुनरिदं
पुनस्त्रिविधा शरीरेंद्रियविषयभेदात् कार्यरूपतिशेषः एवमग्रेपि त्रैविध्ये हेतुमाह इंद्रियेति स्वयमा शरीरेति
मात्मभेदपदं प्रत्येकमभिसंबध्यते इति नियमाच्छरीरभेदादिंद्रियभेदाद्विषयभेदादित्यर्थः अंत्याव
यवित्वे सति चेष्टाश्रयत्वं शरीरत्वम् हस्तादिवारणाय सत्यंतं घटादिवारणाय विशेष्यं अंत्यावयवित्वं
च अवयवजन्यत्वे सत्यवयवाजनकत्वम् अवयवत्वं चेदं स्वसमवायिकारणत्वम् अवयवित्वं च जन्यद्र
व्यत्वं चेष्टा चेहिताहित प्राप्तिपरिहारार्था क्रिया तदिदं शरीरं द्विविधम् योनिजमयोनिजं च
शुक्रशोणितपरस्परमेलनजन्यं शरीरं योनिजं तद्भिन्नमयोनिजं आद्यमपि द्विधा जरायुजमंडजं च
गर्भावरकचर्मपुटकं जरायुस्तज्जन्यं जरायुजमिदं चास्मदादीनाम् अंडजं पक्ष्यादीनाम् अयोनिजं त्रिवि
धम् स्वेदजमुद्भिज्जमदृष्टविशेषजन्यं चाद्यं स्वेदजं यूकालिक्षादीनामुद्भिज्जं वृक्षादीनाम् अदृष्टवि
शेषजन्यं मन्वादीनाम् ननु वृक्षादीनां शरीरत्वे किं मानमिति चेदेवं मैवम् वृक्षाः शरीरी आध्यात्मिक
वायुसंबंधादित्यनुमानात् ननु तत्रैव मानं नापश्याम इति चेन्न वृक्षाः आध्यात्मिकवायुसंबंधवान्
वृद्धिक्षतपादिमत्वादित्यनुमानं कल्पय मन्वादीनामयोनिजत्वे मिच ब्रह्मणो मानसाः मन्वादयः पुत्रा इति

रूपेगधेरसस्पर्शान्नेरसांसिद्धिकोद्रवः पुद्याादि भावनांनअपराद्यैवेशेषिकोगुणाः॥३॥

इति श्रुतिःप्रमाणम् योनिंविनानशरीरमितिवेदे योनिपदंकारणपरमितिमंतव्यम् इतिशरीरणामा
न्यनिरूपणम् शद्धेतरोद्भूतविशेषगुणानाश्रयत्वेसति ज्ञानकारणमनःसंयोगाश्रयत्वमिंद्रि
यत्वं शद्धेतरेयेउद्भूतविशेषगुणाः घटनिष्ठरूपादयस्तदनाश्रयत्वेज्ञानस्यकारणीभूतोयोयं
मनःसंयोगस्तदाश्रयत्वंचचक्षुरादावस्तीतिलक्षणसमन्वयः भवत्येवेंद्रियमनःसंयोगोज्ञा
नकारणम् आत्मामनसासंयुज्यतेमनइंद्रियेणेंद्रियमर्थेनततःप्रत्यक्षमितिनियमात् आ
त्मादिवारणायसत्यंतं कालवारणायविशेष्यं अव्याप्तिवारणायशद्धेतरेति चक्षुरिंद्रिया
दावनुद्भूतरूपसत्वादव्याप्तिवारणायोद्भूतेति संयोगस्यद्विनिष्ठत्वेन इंद्रियार्थसंयोगाश्रय
त्वस्यचक्षुरादौसत्वाद्विशेषगुणेति स्वघ्वंसकारणीभूतःकालमनःसंयोगस्तदाश्रयत्वंका
लस्यतिज्ञानपदं प्राचांमतेइंद्रियावयवार्थावयवयोःसन्निकर्षापिज्ञानकारणम् तदाश्र
यत्वमिंद्रियावयवेगतंअतोमनःपदं यद्वाकालेरूपंनास्तीतिप्रत्यक्षप्रतिचक्षुःसंयुक्तविशेषणतायाः
कारणत्वेनतद्घटकीभूतसंयोगाश्रयत्वंकालेगतंततोमनःपदं नचात्मवारणायात्मान्यत्वमेवनिविश्यतां

इतीन्द्रियसामान्यनिरूपणम् भोगोपयोगीविषयः भोगश्चसुखदुःखान्यतरसाक्षात्कारः यद्येतल्लक्ष
णं शरीरादावतिव्याप्तमिति विभाव्यते तदा शरीरेन्द्रियभिन्नत्वमेवतदनुसर वस्तुतस्तु शरीरादिकम
पिविषयएव भेदेनकीर्त्तनंतुबालधीवैशद्याय इतिविषयसामान्यनिरूपणम् पार्थिवंशरीरं
दर्शयति शरीरमिति शरीरमस्मदादीनां आदिपदेनपश्वादीनांपरिग्रहः गंधवच्छरीरंपा
र्थिवशरीरमितितल्लक्षणंबोध्यम् एवमग्रेपि अत्रजलादिसत्त्वात्पंचभौतिकत्वंदेहा
रः पार्थिवभागस्यमुख्यत्वात्पार्थिवत्वं एवमन्यत्रापि पार्थिवेन्द्रियस्यलक्षणमाह इंद्रियमिति
इंद्रियंगंधग्राहकंघ्राणं नासाग्रवर्त्ति चक्षुरादावतिप्रसंगवारणायगंधग्राहकमिति सन्निक
र्षव्यभिचारवारणायेंद्रियमिति अथवापार्थिवेंद्रियंदर्शयति इंद्रियमिति गंधवदिंद्रियंपार्थि
वेंद्रियमिति तल्लक्षणंबोध्यम् एवमग्रेपि ननुपार्थिवेंद्रियंनिष्प्रयोजनत्वादनारंभणीयमित्या
शंकाभिरस्तुतु तत्प्रयोजनमाह गंधग्राहकमिति तथाचगंधग्राहएवतत्प्रयोजनमस्तिन
ज्ञानकत्वात्पार्थिवेंद्रियमावश्यकमेवेतिभावः इदमुपलक्षणम् येनेंद्रियेणयद्गृह्यतेतेने

द्रियत्व तन्निष्ठाजातिः तदभावस्याग्रहणे इति नियमात् गंधत्वादेरपि ग्राहकमित्यर्थः एवमग्रेपि
नन्वस्तु गंधग्राहकत्वेन घ्राणनामकमिंद्रियं तथापि तस्य पार्थिवत्वे किं मानमिति चेन्मैवं घ्राणें
द्रियं पार्थिवं रूपादिषु पंचसु मध्ये गंधस्यैवाभिव्यंजकत्वात् कुंकुमगंधाभिव्यंजकगोघृतादि
वद्वायूपनीतसुरभिपार्थिवभागवदित्यनुमानस्यैव मानत्वात् नवशरावगतगंधव्यंजकजले व्यभि
चारवारणायैवकारः तस्य शक्तुरसस्यापि व्यंजकत्वात् मध्यांतोपपादनेन घ्राणस्य गंधत्वव्यं
जकत्वेपि न क्षतिः हेतुशरीरे द्रव्यत्वमपि निवेश्यते न सन्निकर्षेन व्यभिचारः तस्य संकेतमाह
घ्राणमिति घ्राणपदप्रतिपाद्यमिति भावः तदाश्रयमाह नासाग्रेति एवमग्रेपि पार्थिवविषयं द
र्शयति विषय इति विषयो मृत्पाषाणादिः आदिना पृथ्व्यादिपरिग्रहः गंधवान् विषयः पा
र्थिवविषय इत्यस्य लक्षणं बोध्यम् एवमग्रेपि इति पार्थिवग्रंथः जलं लक्षयति शीतेति शीतस्प
र्शवत्य आपः नं च चंदने शीतत्वं शीतशिलातलमित्यादिप्रतीतेः पृथिव्यामतिव्याप्तिरिति वाच्यम्
जलसमवेतशीतस्पर्शस्यैव स्वसमवायिसंयोगसंबंधेन तत्र भानात् जलं विभजते ता इति ता

द्विविधाः नित्या अनित्याश्च नित्याः परमाणुरूपाः अनित्याः कार्यरूपाः पुनस्त्रिविधाः शरीरेन्द्रियवि
षयभेदात् शरीरमिति शरीरं वरुणलोके इदमयोनिजमेव एवमुत्तरत्रापि ज्ञेयं ननु जलीय
शरीरस्य नखदंतकराद्यसंभवेनाहाराद्यसंभवात् कथं भोगायतनत्वमुपपद्यत इति चेन्न अस्याः पा
र्थिवादिभागसंमिश्रितत्वेन करकादिवत् घनीभूतत्वाद् दृढीभूतस्य तस्य तालुत्वादिवाग्व्यापारादिसं
भवेनाहारविहारादिसंभवाद् भोगायतनत्वोपपत्तेः एवमुत्तरत्रापि इंद्रियमिति इंद्रियं रसग्राहकं
रसनं जिह्वाग्रवर्ति ननु रसनेन्द्रियस्य जलीयत्वे किं मानमिति चेत् श्रूयतां रसनेन्द्रियं जलीयं
रूपादिषु पंचसु मध्ये रसस्यैवाभिव्यंजकत्वात् ला[illegible]लावदित्यनुमानं मानं हरीतक्यामलका
दौ व्यभिचारवारणायैवकारः तस्य जलमाधुर्यव्यंजकत्वात् कुसुमादिरूपस्यापि व्यंजक
त्वात् शेषं सुगमं विषय इति विषयः सरित्समुद्रादिः आदिना तडागहिमकरकादीनां ग्रहः
ननु हिमकरकादीनां जलत्वे तत्र नैमित्तिकद्रवत्वं न स्यादिति चेत् को वा नेति ब्रूते अदृष्टवि
शेषेण घनीभावात् सांसिद्धिकद्रवत्वप्रतिबंधमात्रकल्पनादिति जलग्रंथः तेजसो लक्ष

णमाह उष्णस्पर्शवदिति उष्णस्पर्शवत्तेजः उष्णं जलमिति धीस्तु जलान्तर्गततेजोनिष्ठोष्णस्पर्श
स्यैवेति तत्र नातिव्याप्तिः चन्द्रकिरणादौ तदन्तर्वर्तिवारिस्पर्शाभिभूतत्वादुष्णस्पर्शस्यानुप
लंभः चक्षुरादावनुद्भूतत्वात्तस्य तथात्वं तेजो विभजते तदिति तद् द्विविधं नित्यमनि
त्यं च नित्यं परमाणुरूपं अनित्यं कार्यरूपं पुनस्त्रिविधं शरीरेन्द्रियविषयभेदात् शरी
रमादित्यलोके इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्त्ति चक्षुषस्तैजसत्वे चक्षु
स्तैजसं रूपादिषु पंचसु मध्ये रूपस्यैवाभिव्यंजकत्वात् दीपप्रभावदित्यनुमानं प्रमाणम्
हरीतक्यादौ व्यभिचारवारणायैवकारः रूपग्राहकमिति इदमुपलक्षणम् महत्वोद्भूत
स्पर्शवत् द्रव्यतद्वृत्तिकर्मसामान्यसमवायसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वा
परत्वद्रवत्वस्नेहानामपि ग्राहकमिति द्रष्टव्यम् ननु वहिरिन्द्रियस्य वस्तुप्राप्यप्रकाशकारि
त्वं विकाशशालित्वेन तत्प्राप्तिसंभवात् न च शाखाचन्द्रमसोस्तुल्यग्रहणानुपपत्तिरिति
वाच्यं इष्टापत्तेः शाखाचन्द्रमसोर्युगपत्स्पृशामीति प्रतीतेरभावात् तेजसोतिशयितवेगशा
लित्वेन क्षणविलंबेनैव [illegible] तद्ग्रहणात प्र[illegible]शस्तपाद भाष्यानुसारेण विषयस्य चानुविंद्यमान विषय

नियमेनक
र्नीनिकाग्र
वर्तिचक्षु
दीपादिरि
नाकव्यधा
कि रतिवर्मे
वेदांचप्रभा
पाडवतम
पि=३

इति विषयश्चतुर्विधः भौमदिव्यौदर्याकरजभेदात् अन्यत्र तदुद्भूतस्पर्शवाननुद्भूतरूपानुद्भूत
स्पर्शवानुद्भूतरूपानुद्भूतस्पर्शवाननुद्भूतरूपवानिति चातुर्विध्ये हेतुमाह भौमेति भौ
मादिति पदं प्रत्येकमभिसंबध्यते तत्र भौममुदाहरति भौममिति भौमं वह्न्यादिकं पार्थिवमात्रें
धनं तेजो भौमं वह्न्यादिकमित्यत्रादिपदेन खद्योतगततेजःप्रभृतेः परिग्रहः दिव्यं दर्शयति
दिव्यमिति दिव्यं विद्युतादि जलमात्रेंधनं तेजो दिव्यं कचिदविंधनं दिव्यमित्यपि पाठः आदिना
र्कचंद्रादीनां परिग्रहः पार्थिवजलोभयेंधनं तेजः औदर्यं तदेवाभिधत्ते भुक्तस्येति भु
क्त पीतपरिणामहेतुरौदर्यं भुक्तस्यान्नादेः पीतजलस्य परिणामो जीर्णता तस्य हेतुरौदर्यमित्यर्थः अ
तरावतदुभयेंधनं धत्ते आकरजं दर्शयति आकरजमिति आकरजं सुवर्णादि अतिंधनं तेज
आकरजं सुवर्णादिकमित्यत्रादिना रजतादेः परिग्रहः अथ सुवर्णवादः ननु सुवर्णं पार्थिवं पी
तत्वाद्धरिद्रादिवदिति चेन्नैतत् घृतजतुप्रभृतिष्वत्यंतानलसंयोगे सति द्रवत्वनाशोपलंभेन जलादि
रूपप्रतिबंधके सति तदनुपलंभेन च पार्थिवद्रवत्वनाशं प्रति प्रतिबंधकाभावविशिष्टात्यंतान
लसंयोगस्य कारणत्वेन सुवर्णतौशससंयोगे सति द्रवत्वनाशापत्तेः प्रतिबंधकत्वं च कारणी

भूताभावप्रतियोगित्वं भवतिहि जलंपार्थिवद्रवत्वनाश [illegible] प्रति[illegible]कारणीभूताभा
भावोजलाभावस्तत्प्रतियोगि मीमांसकाःतु तमइवसुवर्णमप्यतिरिक्तद्रव्यमितिप्राशंकिरे
तदपिनयुक्तं लक्षणैस्तभावेसंभवत्यतिरिक्तद्रव्यत्व[illegible]कल्पनायामन्याय्यत्वात् ननुसुवर्ण
स्यतैजसत्वेकिंमानमिति चेदत्रब्रूमः सुवर्णंतैजसंप्रतिबंधकाभावविशिष्टअत्यंतानलसं
योगेप्यनुछिद्यमानद्रवत्वाधिकरणत्वात् यन्नैवंतन्नैवं यथासर्पिरिति सलिलान्नतनु
हुताशनासंयुक्तसर्पिषिव्यभिचारवारणायसंयोगांतम् ननुसुवर्णस्यतैजसत्वेतन्निष्ठो
ष्णस्पर्शभास्वररूपयोःग्रहणस्यादितिचेन्न बलवत्सजातीयपार्थिवरूपस्पर्शाभ्यांतन्निष्ठभा
स्वररूपोष्णस्पर्शयोरभिभवादतः इतिसंक्षेपः इतितेजोग्रंथः वायुंलक्षयति रूपरहितस्प
ति रूपरहितस्पर्शवान्वायुः घटादिवारणायविशेषणम् आकाशादि वारणायविशे
ष्य अयंवायुःउपलक्षणतावादः ननुवायुसद्भावेकिंमानमितिचेदत्रप्राचः विषयतासंबंधेनवहि
रुत्पन्नमहत्त्वावछिन्नप्रतिसमवायसंबंधेनमहत्वविशिष्टोद्भूतरूपमुद्भूतस्पर्शश्चकारणं एवंस्प
र्शवायोतदभावाद वायुप्रत्यक्षः किंत्वनुमेयः तथाहि योयंवायोवातिसमंतत्स्पर्शोष्णशीतस्पर्शले

इत्यसंभव
ति ता

केप्रतीयते स स्पर्शः क्वचिदाश्रितः गुणत्वाद्रूपवदित्यनुमानेन किंचिदाश्रितत्वे साधनीये यत्किंचि
सद्द्रव्यत्वं सिध्यति तदेव वायुरित्युच्यते न च तत्पृथिवीं महत्त्वोद्भूतस्पर्शवत्त्वात् पार्थिवस्योद्भूतरूपं भवितु

ते वं नियमात् नापि जलतेजसी तत्रानुष्णाशीतस्पर्शाभावात् नाप्याकाशादिचतुष्टयं तस्य वि
तैः भुत्वेन सर्वत्र तादृशस्पर्शप्रत्यक्षापत्तेः नापि मनः तस्याणुत्वेन स्पर्शस्याप्यनध्यक्षत्वापत्ते महत्त्व
रित्याहुः नवीनास्तु बहिर्द्रव्यप्रत्यक्षं प्रति महत्त्वविशिष्टविभुत्वावच्छिन्नविशेषगुणः कार त्वापत्तेः
णं महत्त्वविशिष्टोद्भूतरूपोद्भूतस्पर्शान्यतरद्वा कारणम् एवं सति वायुरपि प्रत्यक्ष एव त
त्र तादृशगुणस्य महत्त्वविशिष्टोद्भूतस्पर्शस्य सत्त्वात् इतरथा वायुं स्पृशामि प्रभां पश्या
मि तप्ते जले तेजः स्पृशामीति अनुभवापलापप्रसंगेन चायं भ्रमः जले स्पर्शानुभ
वस्यापि तथात्वापत्तेः ननु द्रव्यचाक्षुषं प्रति द्रव्यस्य स्पार्शनं प्रति च प्रत्येकं किं कारणमिति चेद
द्येमहत्त्वविशिष्टोद्भूतरूपं द्वितीये महत्त्वविशिष्टोद्भूतस्पर्शं न चायं पक्षो गरीयान् प्राचां मते
द्रव्यस्पार्शनकारणत्वस्वरूपेऽप्यभ्युपगम्यत्वेन तुल्यत्वात् इत्याचक्षते वायुं विभजते स द्विवि
ध इति स च द्विविधो नित्योऽनित्यश्च नित्यः परमाणुरूपः अनित्यः कार्यरूपः पुनस्त्रिविधः

।शरीरेन्द्रियविषयभेदात् शरीरं वायुलोके इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्त्ति विषयो वृक्षादिकंपनहे
तुः शरीरांतःसंचारी वायुः प्राणः स चैकोप्युपाधिभेदात्प्राणापानादिसंज्ञां लभते शरीरमिति तच्च
पिशाचादीनामपि स्पर्शग्राहकमितीदमुपलक्षणम् महत्वोद्भूतरूपस्पर्शवत् द्रव्यतद्वृत्तिकर्मसामा
न्यसमवायसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वद्रवत्वस्नेहानामपि ग्राहकं त्वगिति त्वगि
न्द्रियमित्यर्थः तत्स्य वायवीयत्वे त्वगिंद्रियं वायवीयं रूपादिषु पंचसु मध्ये स्पर्शस्यैवाभिव्यंजकत्वात्
अंगसंगिसलिलशैत्याभिव्यंजकव्यजनपवनवदित्यनुमानं मानं सलिलशैत्यव्यंजके मनसि काला
दौ चातिप्रसक्तिवारणायैवकारः वृक्षादीत्यत्रादिपदेन घासादीनां परिग्रहः ननु प्राणस्याधिक
स्य सत्वात् कुतो नोक्तः तत्तद्विभाग इत्यत आह शरीरांतरिति तथा च विषयवायोरंतर्भाव इत्य
र्थः अपानादेरतिरिक्तत्वमाशंक्य प्राणे तस्यांतर्भावमभिधत्ते स चेति प्राणस्त्वित्यर्थः एकोपीति।
एक एव प्राणो हृदयादिस्थानरूपोपाधिभेदात् अपानादिशब्दैर्व्यवह्रियत इत्यर्थः तदुक्तं हृदि प्रा णा
णो गुदेऽपानः समानो नाभिसंस्थितः उदानः कंठदेशस्थो व्यानः सर्वशरीरगः अयं च मुखनासि
काभ्यां निर्गमनप्रवेशनात् प्राणः मलादेरधोनयनादपानः भुक्तपरिणाममापाद्य जाठरानलस्य समुन्नयनात्स

मानः अन्नादेरूर्द्ध्वनयनादुदानः नाडीमुखेषु विततनाद्व्यानः इति क्रियारूपोपाधिभेदात्तथाव्यवह्रियत इ
त्यर्थः एवं नागकूर्मकृकलदेवदत्तधनंजयाख्यवायूनामपि प्राणांतर्भावः नागउद्गारहेतुः कूर्मउन्मी
लनस्य कृकलः क्षुधायाः देवदत्तो विजृंभणस्य धनंजयोऽपि पोषणस्येति बोध्यम् इति वायुग्रंथः
इदानीं कार्यद्रव्यस्योत्पत्तिविनाशक्रममाचक्ष्महे परमेश्वरस्य चिकीर्षावशात् परमाणुषु कर्मो
त्पत्तिः तदनंतरं द्वयोः परमाण्वोः संयोगस्ततो द्व्यणुकोत्पत्तिः तत्र परमाणौ समवायिकारणं परमा णुः
णुद्वयसंयोगोऽसमवायिकारणम् परमेश्वरज्ञानेच्छा[illegible]कृतयः कालो दिक् प्रागभावोऽदृष्ट तृ ग
प्रतिबंधकाभावश्च निमित्तकारणम् एतेषां कार्यमात्र एव निमित्तकारणत्वात् तदनंतरं त्रि
षु द्व्यणुकेषु कर्मोत्पत्तिस्ततस्तेषां संयोगः ततस्त्र्यणुकोत्पत्तिः एवं चतुरणुकाद्युत्पत्तिक्रमेण महापृथिवी म
हापः महत्तेजो महान्वायुरुत्पद्यते एवं परमेश्वरस्य कार्यद्रव्यसंजिहीर्षावशात् परमाणुषु कर्मोत्पत्तिः
ततः परमाणुद्वयविभागस्ततः परमाणुद्वयसंयोगनाशस्ततो द्व्यणुकनाशस्ततस्त्र्यणुकनाशः एवं च
तुरणुकादिनाशक्रमेण महापृथिव्यादीनां नाशः अयमेवावांतरप्रलयः इत्युच्यते सर्वकार्यद्रव्यध्वंस
वा स्यैवावांतरप्रलयत्वात् महाप्रलयस्तु सर्वभावकार्यध्वंसः भावकार्यं चानित्यद्रव्यमनित्यगुणः क

सिद्धे किं पुनः सृष्टिप्रलयसद्भावे प्रमाणमिति चेत् धाता यथापूर्वमकल्पयदित्यादिश्रुतिः मीमांसकास्तु संसार
प्रवाहस्य बीजांकुरन्यायेनानादित्वादनंतत्वाच्च प्रलयसद्भावे मानाभाव इत्याहुः अत्र प्राचः क्वचित्सम
वायिकारणनाशाद्द्रव्यनाशः क्वचिदसमवायिकारणनाशाद्द्रव्यनाशः यथा कपालरूपसमवा
यिकारणनाशाद्घटनाशः परमाणुद्वयसंयोगरूपासमवायिकारणनाशाद्द्व्यणुकनाशमंगीचक्रुः
नव्यास्तु लाघवात्सर्वत्रासमवायिकारणनाशात्तमंगीचक्रुरित्यलंपल्लवितेन इति कार्यद्रव्योत्पत्तिवि
नाशक्रमनिरूपणम् आकाशं लक्षयति शब्दगुणमिति शब्दगुणमाकाशं तच्चैकं विभु नित्यं च शब्दो
गुणो यस्य तत् यद्यपि शब्दवत्त्वमेव लक्षणमुचितं तथापि मदीनामते शब्दस्य द्रव्यत्वं तन्निरासार्थं
गुणपदमुपात्तं क्वचिच्छब्दगुणकमाकाशमित्यपि पाठः शब्दगुणमेव शब्दगुणकमिति स्वार्थिकः प्र
त्ययः शब्दं गुणं करोति जनयतीति शब्दं गुणयतीति वा शब्दगुणकं शब्दसमवायिकारणमिति यावत्
एतेनाकाशे प्रमाणमपि दर्शितं तथा हि शब्दोऽष्टद्रव्यातिरिक्तद्रव्याश्रितः अष्टद्रव्यानाश्रि
तत्वे सति समवायिकारणकत्वात् यन्नैवं तन्नैवं यथा रूपमिति परिशेषानुमानेन तादृ
शद्रव्यविधयाकाशं सिध्यति रूपादिकारणायसत्त्वं तं रूपत्वादि कारणायविशेष्यपरिशेषस्म

प्रसक्तस्य प्रतिषेधेऽन्यत्राप्रसंगात् परिशिष्यमाणो संप्रत्ययः नच विशेष्यासिद्धिः शब्दः समवायिकारणकः
जन्यगुणत्वात् पृथिवीरूपवदित्यनुमानेन तत्सिद्धेः नच विशेषणासिद्धिरपि शब्दोऽष्ट द्रव्यानाश्रितः
पि श्रोत्रग्राह्यत्वात् शब्दत्ववदित्यनुमानेन तस्यासिद्धेः ननु तस्य गुणत्वमेव किं मानमिति चेत् शब्दो गुणः व्यभिचार
प णः अनित्यत्वे सत्येकेन्द्रियग्राह्यजातीमत्त्वात् रूपवदित्यनुमानं मानं अणुकोविनैकातिकत्ववारणाय दा
जातीमत्त्येति अन्यत्वं स्पष्टं आकाशस्य पृथिव्यादिवदनेकत्वे मानाभावादाह तच्चैकमिति
चत्वर्थे नचाकाशस्यैकत्वे घटाकाशो मठाकाश इति व्यपदेशः कथमिति वाच्यम् घटादिरूपोपाधिभे
देन तादृशव्यपदेशात् सर्वत्र शब्दोपलंभादाकाशस्य विभुत्वमावश्यकमिति ब्रूते विभिति आका
शस्य विभुत्वादेव नित्यत्वं सेत्स्यतीत्याह नित्यं चेति नन्वात्मन आकाशः संभूत इ [illegible]
तिवेदेनाकाशस्य जन्मत्वप्रतिपादनात्कथं तन्नित्यं यज्जन्यं तदनित्यमिति व्याप्तेरिति चेन्न संभू
तशब्दस्य व्यक्तताद्रूपोपाधिवशात् आभिव्यक्त इत्यर्थकत्वात् वस्तुतस्तु अनेन जन्यजनकभावस्य आकाश
नुमानविरुद्धत्वेन तस्याप्रामाण्यवादत्वमात्रकल्पना संगच्छते इति वदंति इदमत्र चिंत्यं आकाशस्य [illegible]
शरीरविषयोऽनस्तः नवनीतेपरंलिंद्रियमस्ति तच्च श्रोत्रं शब्दधीजनकमिंद्रियं श्रोत्रं श्रोत्रेन्द्रिय

स्याकाशत्वेकप्रमितिचेन्न यदिंद्रियंरूपादिकमध्येयंगुणंगृह्णातितदिंद्रियंतद्गुणत्वयुक्तमितिनियमाच्छो
त्रस्यशब्दग्राहकत्वेनशब्दवैरूप्यंतत्राकाशत्वस्याबाधितत्वात् अथसतिकुड्यसर्वंचित्रमितिमा
येनसर्वमिदंतदेवसंभवति यदींद्रियंस्यात्तदेवमानेनलक्ष्यामहे इतिचेन्न यावत्क्रियासा
पृहोला० हाकरणसाध्या इतिव्याप्तेर्वास्यादिरूपकरणसाध्यछिदिक्रियादौदृष्टत्वेनगंधाद्युपलं
भः करणसाध्यः क्रियात्वात् छिदिक्रियावदित्यनुमानेनतादृशकरणत्वेनेंद्रियस्यसिद्धेः
इत्याकाशग्रंथः आकालंलक्षयति अतीतेति अतीतादिव्यवहारहेतुःकालः अतीतइत्यादिर्यो
व्यवहारः अतीतोभविष्यत्वर्त्तमानइत्यात्मकस्तस्यासाधारणहेतुःकालएवइत्यर्थः नन्विदं
लक्षणमाकाशेतिव्याप्तं व्यवहारस्यशब्दात्मकत्वादितिचेन्न अत्रहेतुपदेननिमित्तहे
तोर्विवक्षितत्वात् नचैवमपिकंठताल्वाद्यभिघातेऽतिव्याप्तिरितिवाच्यं विभुत्वस्यापि
निवेशात् अथेदंलक्षणं महाकालेऽव्याप्तं अतीतइत्यादिव्यवहारस्यरविक्रियादिरूपखं
डकालनियम्यत्वादितिचेन्नेवंमंस्थाः महाकालेप्युपाधिभेदेनतादृशव्यवहारभेदसंभवात् ३
पाधिश्चस्वजन्यविभागप्रागभावावच्छिन्नाक्रियासत्वपदेनरविक्रियातज्जन्योयोविभा

ले० टी०

१६

गोरविसर्वदेशावोत्तसप्रागभावत्वादृशक्रियोत्पत्तिकालेतिष्ठति तदवच्छिन्नास्यैवार्कक्रियाद्यमेवो
पाधिरित्युच्यते अतीतत्वंचवर्तमानध्वंसप्रतियोगित्वं भविष्यत्वंच वर्त्तमानप्रागभावप्रतियो
गित्वं वर्त्तमानत्वंच दृश्यमानोपाधिसंबंधित्वं एतत्त्रित्वंचं महाकाले अतीतत्वादिकंद
(गहनेवने) र्शितप्रायमित्यलमतिकठनविषयकांतारप्रदर्शनेननशिशूनां अथकालेकिंमानमितिचे
त् शृणु बहुतरदिवाकरक्रियाविशिष्टशरीरज्ञानात्कालिकपरत्वोत्पत्तिरितिसिद्धांतः
(शे) तज्ज्ञानंविशेषणविशेष्याभयसंबंध घटकसापेक्षं साक्षात्संबंधाभावेसतिविशिष्टज्ञान (भा)
त्वात् लोहितस्फटिकज्ञानवदित्यनुमानेनविशेषणविशेष्याभयसंबंधघटकसापेक्ष
त्वेसाधनीये तादृशसंबंध घटकविधयाकालःसिध्यति नचतादृशसंबंधघटक
स्याकाशस्यात्मा वाभवितुमर्हति तयोःशब्दज्ञानाश्रयत्वेनैवधर्मिग्राहकमानसिद्धत्वेनरवि
क्रियोपनायकत्वासंभवात् तादृशसंबंधश्चसमवायिसंयुक्तसंयोगः खक्रियातत्समवा
यीदिवाकरस्तत्संयुक्तःकालःतत्संयोगःशरीरे सचजगदाधारःकार्यमात्रेनिमित्तकारण
चेतिमानिकमेवप्राक् ननुतस्यजगदाधारत्वेकार्यमात्रप्रतिनिमित्तकारणत्वेचकिंमानमितिचेन्न

२८

कालः सर्ववाग्निदानीं घटो भवतीति प्रतीत्यादेव मानत्वात् क्षणदिनमासादिव्यवहारस्योपाधिभेदानुविधा
यित्वात् कालस्यैकत्वेनिराबाधमिति संघट्टते सचेति सर्वत्रकार्योत्पत्तेर्विभुत्वमप्यष्टव्यमित्यभि
संधत्ते विभुरिति विभुत्वादेव नित्यत्वं संपद्यते इत्याशयेनाह नित्यश्चेति इति कालग्रंथः दिशंलक्ष
यति प्राच्यादीति प्राच्यादिव्यवहारहेतुर्दिक् इयं प्राचीयमवाचीयं प्रतीचीयमुदीचीत्यादिव्यवहा
रासाधारणकारणंदिगित्यर्थः ननुदिशि किं मानमिति चेदनुमानमेवतत् तथाहि प्रतिज्ञामा मान
नेशानामध्ये हिरिति चेन्नैवं बहुतरमूर्तसंयोगविशिष्टपिंडज्ञानात् देशिकपरत्वोत्पत्तिरि
तिनिर्विवादं एवं च तद्ज्ञानं विशेषणविशेष्याभावसंबंधघटकत्वापेक्षात्संबंधाभावे
सति विशिष्टज्ञानत्वादित्यनुमानस्य जागरूकत्वात् अत्र संबंधश्च बहुतरमूर्तसंयोगस्य स्व
समवायिसंयुक्तसंयोगः तेन संबंधघटकादिक् सिध्यति साचजगदाधारानिखिलकार्यनि
त मित्तकारणं चेत्याभिर्हि मेवेति प्राक् दिक् निखिलपदार्थवती इह घटो भवतीत्यादिनिरंकु
शाधीत्वमानमितिमंतव्यं प्राच्यादिव्यवहारस्योपाधिभेदप्रयोजकत्वादिगेकैवेति ब्रूते सा
चेति ननु दिश एकत्वे प्राचीत्यादिव्यवहार [illegible] भेदः कथमिति चेन्न उपाधिभे
उपाधिभेदेन उपाधिभेदप्रयोजक

सि॰ टी॰

३५

दे॰ नतादृशव्यवहारभेदात् तथाहि यस्मादुदयाचलसन्निकृष्टं यन्मूर्त्तं तत्तस्मात्प्राची यथा प्रयागात् का-
शी यस्मादुदयाचलविप्रकृष्टं य[न्मू]र्त्तं तत्तस्मात्प्रतीची यथा गयायाः पाटलपुत्रात् वा काशी यस्मात्कन-
काचलसन्निकृष्टं यन्मूर्त्तं तत्तस्मादुदीची यथा रामेश्वरक्षेत्रात् काशी यस्मात्कनकाचलविप्रकृष्टं
यन्मूर्त्तं तत्तस्मादवाची यथा काशीतो रामेश्वरक्षे[त्र]ं एवं खंडान्तरेपि तदुक्तं सर्वेषामेव वर्षाणां
मेरुरुत्तरतः स्थित इति एवं महादिशां मध्ये वोपाधिभेदमादाय तादृशव्यवहारो बोध्यः इदमत्र
बोध्यम् जन्यमात्रं क्रियामात्रं वा कालोपाधिः मूर्त्तिमात्रं दिगुपाधिरिति इति लिंगग्रंथः आत्मानं दि
निरूपयति सचैकात्मनिसामिर्पीच ज्ञानाधिकरणमिति ज्ञानाधिकरणमात्मा ज्ञानसमवायि-
त्वेन कालेनातिव्याप्तिः आत्मानं विभजति स इति स द्विविधः परमात्मा जी[illegible]
वश्च परमात्मेति परमत्वमुत्कृष्टत्वं तच्च प्रकृते सृष्ट्यादिकर्तृत्वमेव परमात्मजीवयोर्वैल-
क्षण्यमभिधत्ते तत्रेति तत्रेश्वरः सर्वज्ञः परमात्मा एकश्च परमात्मजीवयोर्मध्ये इत्यर्थः
परमात्मा ईश्वरः सर्वज्ञश्च एक एवेत्यर्थः (तदादौ सचेति पूरणीयम्) नित्यज्ञानाधिकरण-
त्वं तल्लक्षणमवगन्तव्यं ननु ईश्वरे कथं नित्यज्ञानमिति चेल्लाघवेनदे परमाणुनां द्व्यणुकेकरि

घ त

३५

स्यामीति ज्ञानस्यावश्यकत्वेन तदुत्पादकशरीरादिकारणकलापस्य तदानीं व्यतिरेकेण तस्य
नित्यत्वमुररीकुर्मः इत्थमीश्वरेच्छाकृत्योरपि अत्र चार्वाकाः ईश्वरस्तद्धर्माश्चेमानाभावः न
चेश्वरत्वे प्रमाणमिति वक्तव्यं तार्किकाणां मते तस्य नीरूपस्पर्शद्रव्यत्वेन बाह्यप्रत्यक्षा
सम्भवात् नाप्यान्तरमपि मनसापरोक्षप्रत्यक्षासम्भवात् नाप्यनुमानं ईश्वरनिरूपितव्या
प्तेरप्रसिद्धेः नच द्यावाभूमी जनयन्देव एको विश्वस्य कर्त्ता भुवनस्य गोप्तेत्यादिवेद एवं
तत्र प्रमाणमिति ईश्वरोक्तत्वादेव तस्य प्रामाण्यसम्भवेनेश्वराभावे तस्याप्यप्रामाण्यात्वा
दित्याहुः तदसत् यत्र कार्यत्वं तत्र कर्तृजन्यत्वमिति व्याप्तेः प्रसिद्धत्वेनांकुरादिरूपका
र्यं कर्तृजन्यं कार्यत्वात् घटवदित्यनुमानेन कर्तृजन्यत्वे साधनीये तत्कर्तृत्वं जीवानां वा
धितमिति तत्कर्तृत्वेनेश्वरसिद्धेः न च विना कर्त्तारं धरणीसलिलसंयोगादिभिरे
वांकुरादीनामुत्पत्तिरिति वाच्यम् घटादीनामपि तथात्वापत्तेः तदुक्तं जगतां यदि नो क
र्त्ता कुलालेन विना घटः चित्रकारं विना चित्रं स्वत एव भवेत्तदेति न च स्वेदजादीनामिवांकु

रादीनामपितथात्वेकान्ततातिरितिवाच्यम् श्वेदजादीनांकर्त्तृजन्यत्वस्वीकारे एतद्दृष्टांतविरोधा
त् अन्यथासंसारेनियतुरभावेगर्भादीनांविपरीतोदयापत्तिः एवंजलधरपटलेनकाले
वृष्ट्यनुत्पादापत्तिः सचेतनमंतरेणाचेतनस्यनियतकालेगमनागमनासंभवात् यस्माज्ज
गत्कर्त्तृकस्यनावश्यकः सएवास्माकमीश्वरः एवंपतनाभावववृष्टेरुत्पत्त्यः पततश्च
तूनौकाद्यतिविधकप्रयत्नयुक्तो धृतिमत्वादित्याद्यनुमानस्यापिप्रमाणयमप्यूह्यम् एवमीश्वरमुपा
सीतयः सर्वज्ञः सर्ववित् यस्यज्ञानमयंतपः सोकामयतइत्यादिश्रुतयोप्यनुसंधेयाः
कर्तृत्वंचकृतिमत्वं यत्तूपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वं कर्तृत्वमिति
तन्नगौरवात् केचित्तुकार्यमात्रंप्रतिजीवेश्वरयो र्नकर्तृत्वेनकारणत्वं अनेककृति
षुकारणतावच्छेदकत्वेगौरवात् किंत्वात्मत्वेनैव एवंसतीश्वरसाधारणात्मत्वजा
तिरपिसिध्यति एतेनसुखादिसमवायिकारणतावच्छेदकतयानेश्वरसाधारणा
त्मासिध्यतीतिपक्षोदिरणापिनक्षतिः अथकथमीश्वरसाधकानुमानमितिचेदंकु

तस्मात्

नूनौकाद्यति
२५

रादिक[illegible]ः मात्मजन्यं कार्यत्वात् घटवदितीति भावयामासुः मीमांसकास्तुक
मेव स्वर्गादिकमेव पुरुषार्थः मन्त्रमयी देवता अर्थवादवेदो न प्रमाणमिति गदंति

सेवक मीमांसकैकदेशिनस्तु परिचारककृतकर्मणः फलदाता यथा भूपालस्तथा वेदोक्तकर्मणः
फलदातेश्वर एवेति सम्मेचिरे कर्मातिरिक्त एवेश्वर इति सम्मेचिरे इतीश्वरवादः नन्वीश्वरः किं शरीरी

फ. उत तद्रहितः नाद्यः तच्छरीरस्य महत्वे उदंबरत्वादो मशकविशेषोत्पत्तिर्न स्यात् तत्र तस्य प्रवेशासंभवात्
मध्यमपरिमाणत्वे अनित्यत्वप्रसंगात् अणुत्वे देशांतरे कार्यानुत्पत्तिप्रसंगाच्च दृश्यत्वादरीदृश्येतैव नापि
शरीराभावे कर्तृत्वस्यैवासंभवादिति चेन्न शरीरस्य तत्र एव कर्तृत्वे मानाभावात् शरीरमंतरेणैवेश्वरेणाम
आदिवत्कार्योत्पादनात् आचार्यानुगास्तु ईश्वरस्य परमाणव एव शरीरमिति केचित् आकाशशरी
रं ब्रह्मेति श्रुतेराकाशमेव तदित्यपरे अन्ये तु संसारिणामदृष्टवशा[illegible]दीश्वरस्य शरीरं भवति तच्च ब्र
ह्मविष्णुशिवानामेति ब्रुवंति परे तु भूतावेशन्यायेनेश्वरस्य शरीरमिति मेनिरे अत्राहुः स ईश्वरः शरीररहि
त एव परं तु तस्य ज्ञानसाध्यपरमपुरुषार्थपदप्रणालिकामूलीभूतोपासनादिभिः संसारपंकनिमग्ना
ञ्जनानुद्दिधीर्षुः लीलाविग्रहं दधाति सच्च शिवशक्तिगणेशार्कविष्णूनां ब्रह्मणश्च तदुक्तं शिवशक्ति

रो गणेशार्कविष्णुरूपात्म ईश्वरः उपासनानुसारेण भक्तेभ्यो भुक्तिमुक्तिदः इति अत एवैष वा शिवादीनां

मीश्वरत्वमसहमाना विष्णोरेव तदङ्गीकुर्वाणाः तत्रैव तद्व्यवस्थापनीं प्रणालिकामारभन्ते किं भोः शिवादीना
मीश्वरत्वं ब्रुवतो भवतो विचारशून्यमाऽप्रतिभाति शिवस्तु विष्णोरुपासकः तामसत्वान्नोपास्यः शक्तिस्तु तदी
यामाया ब्रह्मादयस्तु तदाज्ञानुवर्त्तिनः किंच लक्ष्मीनिवाससाम्यं कुतः शिवस्य श्मशानवासिनः कुतस्तरां
शक्त्यादीनां अन्यस्य च विष्णुव्यतिरिक्तानामुपासनैव निषिद्धा तदुक्तं वासुदेवं परित्यज्य य उपास्तेऽन्यदेवतां
तृषितो जाह्नवीतीरे कूपं खनति दुर्मतिरित्याहुः अथ शैवाः अललं लघुचलितं गजावातसमानमन्युमवल
वमानाः शिवस्यैवेश्वरत्वं दृढीकुर्वाणा विष्ण्वादीनां तत्सेवकत्वप्रतिपादकसरणिं शरणीकुर्वन्ति किं
भोः श्रीमच्छिवस्य कटाक्षलेशमात्रमाश्रित्य महापदवीं प्राप्तवतां विष्ण्वादीनामीश्वरत्वं कुतः विष्णुस्तु शि
वोपासकः एतदेव स्वनेत्रसमर्पितलाञ्छनकौ पुण्डरीकाक्ष इति नाम लब्धवानाराधनान्तरे लक्ष्मीवैकुण्ठच
त्वराप्याप्यपि रामेणापूजितो रामनाथः सेतौ प्रत्यक्षतासिद्धः न च तर्हि कथं विष्णुचरणोदकं बिभर्त्ति हर इ
ति तत्र भक्तिपराधीनत्वात् एतदेवेश्वरः परमेश्वर इत्ययमेव व्यवह्रियते शक्तिरस्यैव माया यः शु
द्धस्फटिकसंकाशः सूर्यचन्द्राग्निलोचनः लीलानाटकसूत्रधारः क्वचिद्घोररूपः क्वचित्सौम्यरूपः
श्मशानवासी क्वचिदनेकदेवगणसमाश्रितानुपमानिर्वाच्यकैलासशिवलोकादिवासी सकलवे
दशास्त्रवेद्यस्य शिवस्य साम्यं कुतो विष्ण्वादीनां कुतो वा उपास्यत्वं तदुक्तं शुद्धस्फटिकसंकाशं त्र्यंबा

पिनमीश्वरम् कलये जगदाधारं विष्णुब्रह्मादिसेवितमिति शिवस्तामसइतिपदुक्तं तत्तुच्छं श्यामवर्णत्वादिदर्श
नेनविष्णोरेवतामसत्वात् संहारसमयेपिशिवेनबहिरेवतामसप्रदर्शनात् रुद्रस्यैकावतारस्याभिन्नत्वात्
पंचश्मशानवासित्वेननैकरूपंप्रदर्शितं तदपिनतस्यस्वातंत्र्यात् तदुक्तं अनंतरूपस्यशिवस्यलीलया
विहारशीलस्यविचित्रकर्मणः अनेकरूपेणाभीप्सितानितस्य रूपहानिर्नभवेत्कदाचनेति सुखंवाकुतस्तस्यदुःख
कुतोवाकुतःसुंदरत्वंकुतोऽसुंदरत्वम् अनेकैःस्वरूपैः अनेकैःप्रकारैःसदालीलयाखेलतश्चमस्य
शिवस्य किंचशिवातिरिक्तदेवतानामुपासनैवनिषिद्धा तदुक्तं महादेवंपरित्यज्ययःउपास्तेन्यदेवतंस
मूढोविषमश्नातिसुधांत्यक्त्वासुदुर्धातुरइतिगायति अत्रशाक्तिकाः किंभोयथाशक्त्याब्रह्मविष्णुमहेशा
निर्मिताः यत्कृपामवलंब्यब्रह्मादयः सृष्ट्यादिकं रचयंतितत्साम्यमपिप्राप्तुंनार्हति तत्रयेदेवाःकुतोवा
तदधीनकत्वेतस्याःपरदेवतायानिगदितमज्ञानतदैविदुः तदुक्तं [illegible] लंचेतिवर्णयामासुः एवंगाण
पत्यादयः ततदोत्कृष्टंवर्णयामासुः अत्रांतरेसकल वेदशास्त्रपारीणाःसर्वेधर्मा एतेषांवादमाक
र्णयंतः किमाश्चर्य[illegible]मिदंशिवद्वेषंकुर्वंतोवैष्णवाः विष्णुद्वेषंकुर्वंतः [illegible] शैवाश्चमोक्षमाकांक्षंति
कथंवाभवेत् अथास्मात्तेपौराणिकादयः एतेषांभेदवादिनांनमोक्षावाप्तिः तदुक्तं शिवस्यहृदयंवि
ष्णुर्विष्णोश्चहृदयंशिवः द्वेषंयंतरकत्वाघोरंवैनरकं व्रजेत् एवमन्येवेदोक्त सर्वंसाशिवःहरिः

शा. उपासन वाद

सेव्यः सोऽन्तरः परमः स्वराडिति तदुक्तं श्रीधरस्वामिभिः माधवोमाधवावीशौ सर्वसिद्धिविधायिनौ वंदे परस्परा
त्मानौ परस्परनुतिप्रियाविति तदुक्तम् सर्वपुराणोपपुराणेषु उक्ताः सांगाश्च वेदाः सत्तपः समस्ताः शास्त्राणि
सर्वाणि विलोकितानि न क्वापि दृष्टः शिवविष्णुभेदः श्रुतौ स्मृतौ शास्त्रपुराणमध्ये केनापि दृष्टः शिवविष्णुभेदः
अद्वैतयोरेवमुखान्नवीनः सर्वैरपि श्रूयते एववादः शिवस्य विष्णोः परमुक्तिरेषा पुरातनी श्रूयते एव सर्वैः
य अज्ञानतो भेदधियं करोति नरः स घोरं नरकं प्रयातीति तत्तद्देवताप्रस्तावे तत्तद्देवतामुख्यकर्तृत्व
स्यादिप्रदर्शनेन कल्पभेदाभिप्रायकं अतएव शक्त्यादीनामपि ताभ्यामभेदः तदुक्तं स्वामिभिः शैवाः
शाक्ताश्च गाणेशाः सौरा विष्णुप्रपूजकाः विद्धि वंतिमिथोभ्रांत्या तेषां न मुक्तिस्तु निष्फला सिद्धांता
बहवः प्रोक्ताः श्रुत्यानानाप्रयोजनैः परं त्वस्याह्यभिप्रायं जानाति विरलः कृती अनेककार्यसि
द्ध्यर्थं रूपं बहुविधं विभोः तत्कार्याज्ञानतो मूढैस्तस्यांशे प्रतिष्ठितमिति इयान्विशेषः यदि शिवे भक्तिर्म
हती स्यात्तदा विष्णुरपि शिवत्वेनैव ज्ञेयः तदुक्तं शिवे चेद्भक्तिर्बहुला यदि स्यात्तथा शिवत्वेन भजेद्धरिं हि हरौ च
भक्तिर्बहुला यदि स्यात्तथा हरित्वेन भजेच्छिवं हि अतः कूपमंडूकन्यायेन लोकाज्ञानमूलम्भवतीति जगद्गुः
वे॰ इतीश्वरवादः जीवनिरूपणमिति जीव इति जीवः प्रतिशरीरं भिन्नो विभुर्नित्यश्च तत्रैव सनुवजते बंधमोक्ष
योग्यो जीवः जन्यज्ञानाधिकरणं वा अयमेव बद्धो बंधात्मेत्युच्यते शरीरसंबंधेन ज्ञानवत्वं तत्रात्मत्वम् प्रतिश

शरीरं भिन्नं इति सुखदुःखादिवैचित्र्यादिति हेतुर्द्रष्टव्यः जीवस्याणुत्वे सर्वशरीरव्यापिसुखाद्यनुपलब्धिप्रसंगः मध्य
मपरिमाणत्वे ऽनित्यत्वापत्त्या कृतहान्यकृताभ्यागमप्रसंगः इत्यभिप्रायवानाह विभुरिति विभुत्वान्नित्यत्वमर्थादेवापातमि
त्याह नित्यश्चेति ननु जीवसद्भावे किं मानमिति चेन्न अहं सुखी अहं दुःखीति मानसप्रत्यक्षस्यैव मानत्वात् नत्वा
त्मा तावन्न प्रत्यक्ष इति भाष्यमते विरोध इति वाच्यम् तस्य परात्मपरत्वात् प्रतिपादितं चैवमेवात्मतत्त्वविवे
के ननु विप्रतिपन्नं प्रति कथं प्रत्यक्षमुपन्यसितुं शक्यमिति चेत्तत्रानुमानमेव मानं बुद्ध्यादयः पृथिव्याद्यष्टद्रव्या
तिरिक्तद्रव्याश्रिताः पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणत्वात् यो यदनाश्रितो गुणः स तद[illegible]तिरिक्त
द्रव्याश्रितः यथा पृथिव्याद्यनाश्रितः शब्द इति अनुमानेन नवमं द्रव्यमात्मा सिध्यति न चैते भूतानां गुणा भ
वन्तीति वक्तव्यं तथा सति तेषामाभ्यन्तरप्रत्यक्षानुपपत्तेः भूतगुणानां रूपादीनां बाह्यप्रत्यक्षस्यैवानुभव
सिद्धत्वात् इतरथा भूतत्वव्यवहारे इन्द्रियग्राह्यविशेषगुणवत्त्वमिति संगच्छते विशेषगुणत्वादेव न दिक्काल
मनसां गुणाः ननु विशेषगुणत्वस्य मानेन न लभामहे इति चेत् बुद्ध्यादयो विशेषगुणाः एकेन्द्रियग्राह्यत्वे
सति गुणत्वात् रूपवदित्यनुमानमेव मानं सुखत्वादौ व्यभिचारवारणाय गुणत्वमिति संयोगादिवारणाय सत्यन्तं
[illegible]मेव एवमिन्द्रियं सकर्तृकं करणत्वात् कुठारवदित्यनुमानेनात्मा सिध्यति अत्र यद्यपि

सामान्यगुणेव्या[illegible]भिका

न.

नास्ति कः क्रमशः शंकंते तत्रादौ शून्यवादिनो माध्यमिकाः सुषुप्त्यव्यवहितोत्तरदशायां सुषुप्तावहं ना
समित्यनुभवात् शून्यमेवात्मा अतएव सर्वमिदं मिथ्यैव तत्र श्रुतिरप्याह असदेवेदमग्र आसीदित्याहुः त
दसत् सुषुप्तावहं नासमित्यनुभवस्याप्रामाणिकत्वात् प्रामाणिकत्वे तामनितस्य ज्ञानाभावपरत्वात् यन्मिथ्ये
दमुक्तं तदपि न सत् प्रत्यक्षतोनुभूयमानपदार्थजातस्य शक्यापलापत्वात् उपदर्शित वेदस्य गतिर्व
क्ष्यते क्षणिकविज्ञानवादिनो योगाचार्यास्तु क्षणिकविज्ञानमेवात्मा तत् द्विविधं प्रवृत्तिविज्ञानमाल
यविज्ञानं च तत्रायं घट इत्यादि प्रवृत्तिविज्ञानं सुषुप्तावहमित्यालयविज्ञानं सुखादिकमस्यैव विकारः
तदतिरिक्तवस्तुन एवाप्रसिद्धेः अत्र श्रुतिरपि अन्योन्तर आत्मा विज्ञानमय इति विज्ञानस्यैवात्मत्वमाहे
त्याहुः तदसत् पूर्वानुभूतपदार्थस्मरणानुपपत्तेः अनुभवितुरिदानीमभावात् अन्यानुभूतेऽर्थेऽन्य
स्य स्मृत्ययोगात् ननु कस्तूरीसुरभिपटवत्पूर्वपूर्वविज्ञानोत्पादितसंस्काराणामुत्तरोत्तरविज्ञाने संक्रांत
त्वमिच्छाम इति माभाषिष्ठाः तथा सति जनन्यनुभूतपदार्थस्य गर्भस्थेन तनयेन स्मरणापत्तेरित्याद्य
न्यत्र विस्तरः सौत्रांतिकास्तु ज्ञानाकारानुमेयक्षणिकबाह्यार्थ एवात्मेतीछंति वैभाषिकाः क्षणभंगु
रवादिनस्तु क्षणिकबाह्यार्थ एवात्मेतीछंति तदुभयमपीदं घटादीनां तथात्वे मानाभावात् एतेन

तस्यानुभवस्य

तारोनास्तिकाबौद्धाइत्युच्यंते बौद्धानांचाष्टादश भेदाः ग्रंथांतरे प्रसिद्धाः उपभेदाश्चबहवः तेचविस्तरभियेहनो
क्ताः चार्वाकास्तुब्राह्मणोहंदत्त वित्रोऽहंगोरोहंस्थूलोहंकृशोहंसुखीत्वहंजानामीत्यादिसामानाधिकरण्य
प्रतीतेः ब्राह्मणत्वादिधर्मवतिशरीरएवज्ञानसुखाद्युपलब्धेश्चतीतिशरीरमेवात्मा त्वत्रश्रुतिरप्या
ह सवाएषपुरुषोन्नरसमयइति ननुशरीरस्यपार्थिवत्वेन घटादिवन्नचेतनंतदितिचेन्नैवंमंस्थाः के
वलनागवल्लीदलस्यरागानुत्पादकत्वेपिनागवल्लीदलखदिरचूर्णक्रमुकसमुदायात्मकतांबूलस्यरा
गोत्पादकत्ववत् केवलपार्थिवस्याऽचेतनत्वेपिभूतचतुष्टयसमुदायात्मकशरीरस्य तथात्वेबा
धकाभावादित्याहुः तन्नमृतशरीरेपिज्ञानापत्तेः ननुज्ञानंप्रतिशरीरप्राण संयोगस्यापिकारणत्वेन
तदानींतदभावान्नतदुत्पत्तिः इतरथाव्यापिकानांनयमुक्तात्मनि ज्ञानापत्तिः शरीरमेवज्ञानकार
णमितिचेत्तर्हिआत्मनोविभुत्वेनमृतशरीरेज्ञानापत्ति वारणंतुगीर्वाणगुरूणामप्यशक्यमिति चेन्न अ
वयवोपचयापचयैः शरीरस्यनानात्वेनपूर्ववद्दृष्टस्मरणावतारात् पुनः स्मृततावीचीतरंगन्यायेनसंस्का
रपरंपरांगीकारस्तुनयुज्यतेबाढगौरवात् फलमुखगौरवंनदोषायेति चेत्तर्हि विहृत्तन्नपत्नमूर्खत्व
दरिद्रत्वादिनियामकंभवेतः किं ब्रुवते संसारस्यस्वभावएवेदं सर्वमितिचेत् वैपरीत्ये किंबाधकं त्वस्तुज

उत्पादविना शशत्वलित्वेन वा सनुभूतप दं स्वर्गादिक स्य अनुपपत्तेः

वे° टी°
२२

न चेद्विषयांतरेणानुसंधीयते इति वाच्यम् अन्यानुभूतेऽर्थेऽन्यस्यानुसंधानायोगाच्च ५

न्नस्समयएवेति चेत् तर्हि तस्मिन्नेव समये जन्मनन्तुसमयांतरे इत्यत्रैव किं नियामकं अस्तीश्वर एव भव
त्वते नियामक इति वक्तुमशक्यं तस्य समदर्शित्वात् तस्माददृष्टमेव नियामकमिति वाच्यम् तच्चात्मा
नमंतरेणानुपपन्नमिति शरीरातिरिक्त एवात्माभ्युपेयः चार्वाकैकदेशिनस्तु काणोऽहं वधिरोऽहं
महं जानामीति इन्द्रियधर्मत्वसामानाधिकरण्यदर्शनादिन्द्रियमेवात्मेत्याहुः तच्च बालप्रलपितं
चक्षुरादिनाशेऽपि योऽहं घटमद्राक्षं सोऽहमिदानीं स्पृशामीत्यभेदप्रतीत्यनुपपत्तेः अपरे चार्वाकास्तु
सुषुप्तिदशायां चक्षुरादीनामुपरमेऽपि मनसः सर्वव्यवहारदर्शनात् तस्य नित्यत्वाच्च मन
एवात्मा अत्र श्रुतिरप्याह अन्योऽन्तर आत्मा मनोमय इतीति मन्यंते तदप्यसत् मनसोऽणुत्वेन सुखा
द्यनुपलंभप्रसंगात् इतरे चार्वाकास्तु प्राणेन विना व्यवहारादर्शनात् पिपासावानहमित्याद्युपल
ब्धेश्च प्राण एवात्मा अत्र श्रुतिरप्याह अन्योऽन्तर आत्मा प्राणमय इति कल्पयन्ति तदपि न युक्तम् त
स्याऽचित्त्वेन तदुरस्युपदर्शित तद्दूषणगणावाणप्रहारपातात् पुत्रे पुष्टे अहमेव पुष्टः पुत्रे नष्टेऽहमेव न
ष्टः इत्याद्यनुभवात् आत्मा वै जायते पुत्र इति श्रुतेश्च पुत्र एवात्मेत्यपि केचित् तदपि न तादृशानुभ
वस्याभिमानत्वात् उपदर्शितश्रुतीनामात्मनोऽन्नानाधिकरणत्वप्रतिपादकत्वं ज्ञानमिति दर्शयमानस्तु

सुषुप्तिदशा
यां तस्यापि श
रीरे चक्षुरा
द्युपरमे घटा
द्यनुपलंभेषु

तिवाध्यत्वात् पूर्वपक्षेतात्पर्यम् दिगंबरास्तु देहातिरिक्तो देहपरिमाणश्चात्मा सचदीपप्रभावत् संकोचविकाश
शालीत्याहुः तदप्यकिंचित्करं तस्यानित्यत्वापत्यातच्छिद्रत्वेपूर्वोक्तदोषवज्रप्रहारपातात् सतएवश्रा
वकाः क्षपणकाजैनाइत्युच्यंते इतिसंक्षेपः इतिनास्तिकखंडनं अथसांख्यशास्त्रज्ञाः आत्ममूलप्र
कृतिमहदहंकारपंचतन्मात्रषोडशविकारभेदात् पंचविंशतितत्वानितत्रशोकरनिर्लिप्ततामर
सपत्रसवत् कर्तृत्वादिनिर्लिप्त आत्मासचन प्रकृतिर्नविकृतिश्चनकारणंनकार्यमिति
यावत् परंतुचेतनश्च मूलप्रकृतिस्तु जगतकर्त्रीनित्याजडाचातएवनविकृतिः महत्तत्वंच
प्रकृतेः परिणामंः प्रकृतिकार्य्यमितियावत् इदमेवबुद्धिरंतःकरणमित्युच्यते अहंकारस्त्वहंतु
रवीडः खीत्याद्यभिमानः अयंचमहत्तत्वस्यकार्यं तन्मात्रेच शब्दस्पर्शरूपरसगंधाः एतेअहंकार
स्यकार्याणिमहदादयश्चैतेसप्तप्रकृतयोविकृतयश्च विकारास्तु श्रोत्रत्वकचक्षुरसनघ्राणानि
पंचज्ञानेंद्रियाणिवाकपाणिपादोपस्थपायवःपंचकर्मेंद्रियाणिमनआकाशवायुतेजोजल
पृथिव्यः पंचभूतानीतिषोडशसंख्यकाः तैर्महाभूतैःशरीरमुत्पद्यते तत्संबंधवशात् प्रकृतिरे
वसर्वंकरोति तत्संसर्गवशादात्मनोहंकरोमीत्यभिमानोजायते सएवात्मनोबंधइत्युच्यते तित्तनिवर्त्त

नात्वमोक्ष इत्युच्यते इत्याहुः तदसत् अहं कर्त्ताऽहं भोक्ताऽहं जानामीति कर्तृत्वभोक्तृत्वचैतन्यादीनां सा
मानाधिकरण्यप्रतीतेरेतेनातिरिक्तप्रकृतिसद्भावे मानाभावात् जडायाः प्रकृतेः कर्तृत्वासंभवाच्च
ननु प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः अहंकारविमूढात्मा कर्त्ताहमिति मन्यते इति भगव
दुक्तेः सामानाधिकरण्योपपत्तेर्भ्रम एवेति चेन्न प्रकृतेरदृष्टविशेषस्य गुणैस्तज्जन्येच्छादिभिर
हमेव कर्त्तेति तदर्थत्वात् अत एव तत्रैवं सति कर्त्तारमात्मानं केवलं तु यः इत्युपरितनभगवदुक्तिः सङ्ग
च्छते इति कृतं पल्लवितेन इति सांख्यमतनिरूपणम् पातंजलशास्त्रमतमाह आत्मा योगगम्यः योगश्च
चित्तवृत्तिनिरोधनं तच्च चित्तस्य बाह्यवृत्तिनिवर्त्तनादंतरभिनिवेशः यमनियमासनप्राणायाम
प्रत्याहारधारणाध्यानसमाधिभेदादष्टौ योगांगानि तत्रास्तेयकर्मनिवृत्तिकरुणार्जवशांतिशौ
च धृति मिताहारसत्यभाषणाजीवाहिंसनब्रह्मचर्यभेदाद्दश यमाः आस्तिकत्वहर्षतपः सुरार्चनदा
नलज्जासद्ध्यानहोमसंतुष्टव्रतजपभेदाद्दश नियमाः पद्मासनस्वस्तिकभद्रवज्रवीरासनभेदात्प
च मुख्यासनानि अन्यान्यपि एकोनाशीतिरासनानि संति पूरककुंभकरेचकभेदात् प्राणायाम
स्त्रिविधः स चाल्पप्राणसंचारनियामकः इंद्रियाणां विषयनिवर्त्तनं प्रत्याहारः नाभ्यादिब्रह्म

रंध्रे तत्तत्स्थानेषु प्राणधारणं धारणा ततो हृदयारविंदे शिवस्य विभावनं ध्यानं ततः प्राणान्निरुध्य तेन सह शिवस्यैकभा
वनं समाधिः एतादृशाभ्याससहितयोगेन शिवमयं ज्योतिरवलोकयते इदमेव समाधिसिद्धिरित्युच्यते तदुक्तम् चित्तस्या
धिकसाधितस्य तु बहिर्वृत्तेर्निरोधः क्रमादंतर्वृत्तिर्यावत्तावदेव विगलती पूर्णमात्मानं स्वादयेत् स्वात्मन्येव सदा सदाशि
वमयं तज्ज्योतिरालोकयेत् स्वानंदानंदपरंपरामनुभवेत् सिद्धिः समाधेरियमित्याहुः इति पातंजलमतनिरूपणम्
वेदान्तिनस्तु एकमेवाद्वितीयं ब्रह्मेत्यादिश्रुतेरेकं ब्रह्मैवास्ति तच्चाविनाशी वा अरे यमात्मा सत्यं ज्ञानमनंतं ब्रह्मेति श्रुतेर्नि
त्यविज्ञानस्वरूपं च तदेवैको [illegible] हं बहु स्यामिति श्रुतेरुपाधिवशात् जीव इत्युच्यते तस्यैव मायानिमित्ताऽविद्याविद्या
द्यां बंधमोक्षौ भवतः शरीरस्यात्मत्वाभिमानकारणमविद्याऽ विद्याविद्यानु तन्निवृत्तिका शरीरस्यात्मत्वाभिमानोऽवि
धः तन्निवृत्तिरेव मोक्ष इत्युच्यते तस्मिन्नेव ब्रह्मणि रज्जौ सर्प इव मिथ्याभूत संसारो भासते तस्माद्बन्धैव
त्वं जगन्मिथ्येत्याहुः इदमपि युक्तं न प्रतिभाति प्रत्यक्षसिद्धपदार्थस्य मिथ्यात्वासंभवात् न च रज्जौ तर्हि क
ह. ल्पितसर्पस्य मिथ्यात्वमिति वाच्यम् प्रसिद्धस्यैव सर्पस्य तत्राभानांगीकारेण दृष्टांतवैषम्यात् न च तत्राप्यसदेव सर्पो भा
सत इति वाच्यम् तथा सति शशशृंगस्यापि भानापत्तेः स्वप्नेऽपि तर्हि स्वप्ने [illegible] शास्त्रव्यवहारादेर्मिथ्यात्वमिति मा भाषि
ष्ठाः प्रसिद्धस्यैव शास्त्रव्यवहारादेः स्वस्मिन्न [illegible] रोपमात्रात् स्वप्नावस्था [illegible] श्रीमानस विपर्यय एव इति वक्ष्यामः
न च मिथ्यात्वप्रतिपादकश्रुतेरप्रामाण्यापत्तिरिति वाच्यम् तस्या जन्मभावस्य नश्वरत्वप्रतिपादने तात्पर्यात् प्र
[illegible] वेदस्य मिथ्यात्व [illegible] पि तस्या [illegible] नास्तिकमतप्रवेशप्रसंगः तदुक्तम् प्रत्यक्षा

मेवंवैलक्षण्यं एकोविद्वानद्वितीयः इत्यादौविद्याधिक्यरूपवैलक्षण्यवत् समानेषुदशसुमुक्ताफलेषुविजातीयोघटस्ते
ह्वैलक्षण्यमस्तेनाद्वितीयव्यवहारापत्तिवारणायैकत्वसमनियतत्वंवैलक्षण्यविशेषणं अयमस्यैवाद्वितीयपदा
र्थत्वात् नन्वेवमस्तितिसर्वंखल्विदंब्रह्मेतिश्रुतिविरोधइतिचेन्नब्रह्मत्वस्यसर्वव्याप्तत्वमित्यर्थकत्वात् व्याप्त
त्वंचसर्वंघटत्वं अन्यथाघटादीनामपिब्रह्मत्वात्वापत्त्याब्रह्मणोऽनित्यत्वापत्तिः जडत्वापत्तिश्च न चैकोहं
बहुस्यामितिश्रुतेरप्रमाण्यप्रसंगइतिवाच्यम् एकोहंनिराकारोब्रह्मविष्णुशिवरूपेणबहुस्यामिति
तदर्थत्वात् ननुतत्त्वमसिब्रह्मविद्ब्रह्मैवभवतीत्यादिश्रुतेःजीवेश्वरयोरभेदप्रतिपादिकायाः
अप्रामाण्यापत्तिरितिचेन्न तत्त्वमसीत्यस्यानिर्दुःखत्वेनतत्सदृशस्त्वमसीत्यर्थकत्वात् एवंब्रह्मै
वभवतीत्यस्यापिपरोश्वर्याधिक्येनपुरोहितोयंराजेवेतिवत् अतएवसर्वे आत्मानःसमर्पिताःनि
रंजनःपरमसाम्यमुपैतीत्यादिश्रुतिः प्रामाण्यमाप्नोति वस्तुतःपूर्वपक्षश्रुतीनामेववेदांतोप
योगिश्रुतीनामर्थकरणेप्रयोजनाभावइतिसंक्षेपः इतिआत्मानिरूपणम् मनोनिरूपयति सुख
नि सुखाद्युपलब्धिसुखादिसाक्षात्कारस्तस्यसाधनंएवमनःइत्यर्थः आत्ममनःसंयोगवारणायेंद्रि
यमिति चक्षुरादिवारणायसुखेत्यादि एतेनमनसिप्रमाणमपिदर्शितं तथाहि सुखादिसाक्षा

कारः करणसाध्यः जन्यसाक्षात्कारत्वात् चाक्षुषादिवदित्यनुमानाच्च चक्षुरादिबाधान्मनः सिध्यतीति मनो वि
भजते तच्चेति मनश्चेत्यर्थः मनसोऽनंतत्वे हेतुमाह प्रत्यात्मेति आत्मानमात्मानं प्रतिप्रत्यात्मानं तस्मिन्नियमेन
वर्त्तमानादित्वादित्यर्थः तथा चैकैकात्मन एकैकं मनसस्तस्यावश्यकत्वेनात्मनामनंतत्वान्मनसोऽप्यनं
तत्वमिति भावः नन्वाकाशादिवन्मनसो विभुत्वे विभुद्वयसंयोगानंगीकारेण ज्ञानोत्पत्तिर्न स्यात् आ
त्ममनसोर्व्यापिकारणाऽप्रसिद्धेरत आह परमाणुरूपमिति परमाणुस्वरूपमित्यर्थः तथा च मनसोऽ
णुत्वेनात्ममनःसंयोगः संभवत्येवेति भावः मीमांसकास्तु मनो विभुस्पर्शरहितद्रव्यत्वादाकाशवदित्य
नुमानेन विभुत्वे सिद्ध इति विभुद्वयसंयोगोऽभ्युपेय एवेत्याहुः नैतत् तादृशसंयोगस्यानित्यत्वापत्त्या सर्वदा ज्ञा
नोत्पत्तिप्रसंगेन सुषुप्त्यभावापत्तेः मन्मतु यदा मनः पुरीततिप्रविशति तदा सुषुप्तिः यदा निःसरति तदा
ज्ञानोत्पत्तिः पुरीतद्बहिर्देशावच्छिन्नात्ममनःसंयोगस्यैव ज्ञानाकारणत्वात् अत एव सुषुप्तिकाले ज्ञानाव
तिवारणाय ज्ञानमात्रे त्वङ्मनःसंयोगः कारणमिति मतं निराकुर्वंति नव्याः ननु मनसोऽणुत्वेना
नावधानिनां कथं युगपद्ज्ञानोत्पत्तिः मनसश्चक्षुरादीन्द्रियसंयोगकाले त्वगिन्द्रियादिना संयोगासंभ
ति वादिति चेन्न मनसोऽतिशयवेगशालित्वेन क्षणविलंबेनैवेन्द्रियसंबंधसंभवात् सह विशेषवशाल्लि
नानावधानिनां ज्ञानमुत्पादयति युगपदनुभवामीति प्रत्ययो भ्रमः अत एवोक्तं मुक्तावल्यां व्यासंगा

शुक्लमतिरिक्तकल्पनेनेति चेन्नैवं व्याप्यवृत्तिजातीयगुणानां व्याप्यवृत्तित्वनियमात् किंच तंतुगतनीलपीतादीनाम
वयवविरोधेन पटे नीलादिनि कुरुत्वस्यैवानुत्पत्तेः रूपाश्रयं विभज्य दर्शयति तच्चेति पृथिव्यादित्रयवृत्त्यर्थः
सप्तविधमिति रूपमित्यनुषज्यते अभास्वरशुक्लमिति ननु कालिन्दीसलिलादौ कथं नीलिमोपलंभ इति चे
न्न तस्यास्थलोपाधिकत्वात् भास्वरशुक्लमिति वैश्वानरादावुपष्टंभक पार्थिवरूपप्रतिबंधाद्भास्व[illegible]रशु
क्लस्यानुपलब्धिः रसं निरूपयति रसनेति षड्विध इति तथाचावयवगतनानारससमुदायादेवतान्नजे
मिचित्ररसानां स्वीकर्तव्य इति भावः रसस्याश्रयमाह पृथिवीति आश्रयं विभज्य दर्शयति तच्चेति पृथिवीज
लयोरित्यर्थः षड्विध इति रस इत्यनुवर्तते जले मधुर एवेति ननु जम्बीरजलादावम्लोपलब्धेः कर्कटीभ
क्षणोत्तरं जले तिक्तोपलब्धेश्च कथं मधुर एवेति चेन्न तस्यौपाधिकत्वात् अतएव शुक्तोपि जम्बीराद्य
म्लोपलब्धिः कर्कटीभक्षणात्पूर्वं जले तिक्तानुपलब्धिश्च ननु जले माधुर्यसत्त्वे कुतो नोपलभ्यत
इति चेन्न हरीतकीभक्षणादीनां तद्व्यंजकत्वात् इति रसं निरूप्य गंधं निरूपयति घ्राणेति पृथिवी
मात्रवृत्तिरिति गंधप्रतीतिः सलिले पृथिवीसंबंधसत्त्वे पृथि[illegible]वीसंबंधाभावे गंधप्रतीत्यभाव इत्यन्वयव्य
तिरेकाभ्यां पृथिवीगंध एव जले प्रतीतिर्बोध्या एवं वाय्वादावपि ननु देशांतरस्थकस्तूरिकुसुमसंबंधप
वनस्यैतद्देशाभावे गंधप्रतीत्यनुपपत्तिः न च वायानीतत्वगंधकादिसंबंधोऽस्त्येवेति वाच्यम् कस्तुर्या

न्यूनतापत्तेः कुशमस्य च छिद्रापत्तेरिति चेन्न नोक्तदोषविशेषेण द्व्यणुकान्तरोत्पत्तेः कर्पूरादौ तु तद
भावान्न तथा इति गंधनिरूपणम् स्पर्शं निरूपयति त्वगिन्द्रियमात्रेति संख्यादावतिव्याप्तिवारणाय मात्रपदं त
वेति पृथिव्यादिचतुष्टयवृत्तिरित्यर्थः शीतेति शीतस्पर्श इत्यर्थः एवमुष्ण इत्यत्रापि प्रसंगाद्रूपादिचतुष्टय
स्य पाकजत्वापाकजत्वे प्रतिपादयन्नित्यत्वानित्यत्वे प्रतिपादयति रूपादीति पाकजमिति पाकजमपीत्यर्थः
पाकस्तेजःसंयोगस्तस्माज्जायत इति पाकजं पाकात्पूर्वमवयविकारणानामिति भावः ननु कथं पाकान्न
जन्मेति चेत् अत्र पीलुपाकवादिनो वैशेषिकाः आमनिक्षिप्ते घटे हुताशनसंयोगात्परमाण्वादि
कपालपर्यन्तावयवेषु क्रिया ततः परस्परविभागः ततः परस्परसंयोगनाशः ततोऽसमवायिका
रणनाशात् द्व्यणुकनाश इति नियमेन श्यामघटस्य नाशेऽवशिष्टेः परमाणवः पच्यन्ते तत्रैव पाके
न रूपादिचतुष्टयोत्पत्तिस्ततः परमेश्वरेणा सर्गादाविव द्व्यणुकादिक्रमेण पूर्ववद्रक्तो घटो
निर्मीयते परमाणुरूपेणैव द्व्यणुकरूपं जन्यते एवं क्रमः अन्यथा घटस्य दृष्टत्वे हुताशनस्यैवे र
शासंभवाद्रूपाद्युत्पत्तिर्न स्यादित्याहुः पिठरपाकवादिनो नैयायिकास्तु घटादिकं सच्छिद्रमेव अन्य
थातदंतर्वीततण्डुलादेः पाको न स्यात् अतस्तत्कलेवरपरमाण्वादिघटपर्यन्तेषु घटनाशं विना
पाकेनैव रूपाद्युत्पत्तिरिति वदन्ति ननु स्पर्शः कथं पाकज इति चेन्न रसालफलादावेतपादिनाको

स्त्वकठिनस्पर्शोत्सादनस्यप्रत्यक्षासिद्धत्वात् केचित्त्ववयवसंयोगविशेषएव काठिन्यादिरित्याहुस्तदस
त् तथात्वेसतितस्यचाक्षुषत्वापत्तेः स्पार्शनसंयोगस्यचाक्षुषत्वनियमात् पाकजत्वादेवानित्यत्व
मित्याह अनित्यंचेति अन्यत्रजलादौ अपाकजमिति अपाकजमेवेत्यर्थः रूपादिचतुष्टयमित्य
नुषज्यते संख्यांनिरूपयति एकत्वादीति एकत्वादिर्व्यवहारस्यैकंद्वित्वमित्यादिव्यवहारस्यहे
तुःसंख्यैवेत्यर्थः ननुसंख्यायामवधिरस्तिनवेत्याह एकत्वादीति तथाच एकंदशशतंचै
वसहस्रमयुतंतथालक्षंचनियुतंचैवकोटिरर्बुदमेवच वृन्दंखर्वोनिखर्वश्चशंखपद्म
श्चसागरः अन्त्यंमध्यंपरार्द्धंचदशवृद्ध्यायथाक्रमम् इतिमहदुक्तेः परार्द्धपर्यन्तैवसंख्येतिभावः
नित्यानित्यभेदेनैकत्वंद्विविधमित्याह नित्यगतमिति गगनपरमाण्वादिगतमित्यर्थः अनित्यग
तमिति परमाणुभिन्नपृथिव्यादिचतुष्टयगतमित्यर्थः अत्रचकारण[illegible] गतमेकत्वमसमवायिका
रणमितिबोध्यं द्वित्वादिकमनित्यमित्यर्थः [illegible]
[illegible]वेत्याह द्वित्वादिकंत्विति आदिनात्रित्वादिपरिग्रहः सर्वत्रेति नित्यानित्यद्रव्ययोरित्य
र्थः तथाचापेक्षाबुद्धिजन्यत्वादिकमनित्यमेवेतिभावः ननुकथमपेक्षाबुद्धिजन्यत्वमिति

चेदुच्यते घटद्वयसन्निकर्षानन्तरमयमेकोऽयमेक इति ज्ञानं जन्यते सैवेयमपेक्षाबुद्धिरित्युच्यते ततो घटद्व
ये द्वित्वमुत्पद्यते अत्र घटद्वयगतमेकत्वद्वयमसमवायिकारणम् घटद्वयं समवायिकारणं अपेक्षाबुद्धिर्नि
मित्तकारणम् ततो द्वित्वे द्वित्वत्वनिर्विकल्पकम् ततः इमौ द्वाविति द्वित्वविशिष्टप्रत्यक्षं तन्निर्वाहार्थ
मेवापेक्षाबुद्धेः स्थितिक्षणावस्थायित्वं कल्प्यते तस्मिन्नेव क्षणेऽपेक्षाबुद्धिनाशः तदुत्तरक्षणे द्वित्वस्य
नाशः तत्रापेक्षाबुद्धेर्नाशः कारणम् अन्यथाऽपेक्षाबुद्धेर्नाशानन्तरमपि द्वित्वप्रत्यक्षापत्तिः ए
वं त्रित्वादावपि बोध्यम् अतो द्वित्वादिकं तु योगीश्वरापेक्षाबुद्ध्या जन्यते तन्नाशश्च योगीनामपे

दि क्षाबुद्धिनाशान्नेति ध्येयम् ननु शब्दबुद्ध्यादिकर्मणां त्रिक्षणावस्थायित्वात्कथमपेक्षाबुद्धिस्त्रिक्षणाव
स्थायिनी किंच योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरवर्त्तिगुणानां कारणत्वाद्द्वित्वनिर्विकल्पकेनै
वापेक्षाबुद्धिनाशाच्चेति चेन्नैवं अपेक्षाबुद्धिभिन्नानामेव विवक्षितत्वात् इति संख्यानिरूपणम् परिमा
णं निरूपयति मानेति मानं परिमितिस्तस्या व्यवहारः इदं महदिदमण्वित्याद्यात्मकस्तस्य कारणं परि
माणमेवेत्यर्थः परिमाणस्याश्रयमाह नवद्रव्येति तच्च नित्यगतं नित्यमनित्यगतमनित्यम् परिमाणं
विभजते तदिति परिमाणमित्यर्थः चातुर्विध्यं दर्शयति अण्विति अणुत्वं महत्त्वं दीर्घत्वं ह्रस्व

वी तृ

ल्ज्ञानमित्यनुमीयते तथा च न्यायसूत्रं युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गमिति मनसो लाघवात्प
रमाणुरूपत्वाद्वानित्यत्वमित्याह नित्यं चेति इति मनोनिरूपणम् अथ द्रव्याणां साधर्म्यवैधर्म्ये
शक्ति यथा पृथिव्यादिनवानां समवायिकारणत्वं साधर्म्यं नित्यद्रव्याणामवृत्तित्वं पृथिव्यप्तेजोवा
युमनसां मूर्तत्वं क्रियावत्त्वं परत्वापरत्ववेगवत्त्वं च किंनाम विभुत्वमिति चेत् मूर्तत्वं च परिच्छिन्नपरिमा
णवत्त्वमिति सम्प्रदायविदः क्रियासमवायिकारणतावच्छेदकतया सिद्धो जातिविशेष इति नव्याः
आकाशादिचतुष्टयस्य विभुत्वं परममहत्परिमाणवत्त्वं च किन्नाम विभुत्वमिति चेत् सर्वमूर्तद्रव्य
संयोगित्वं परममहत्परिमाणवत्त्वं वा दिक्कालमनोभिन्नद्रव्याणां विशेषगुणवत्त्वं आकाशजीव
योरव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकविशेषगुणवत्त्वं च अव्याप्यवृत्तिर्नाम स्वात्यन्ताभावसमा
नाधिकरणत्वं क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वं पृथिव्यादिपञ्चानां भूतत्वं तच्चात्मावृ
त्तिविशेषगुणवत्त्वं वा पृथिव्यादिचतुर्णां द्रव्यसमवायिकारणत्वं स्पर्शवत्त्वं च पृथिव्यादित्र
याणां रूपवत्त्वं द्रवत्ववत्त्वं च पृथिवीजलयो रसवत्त्वं गुरुत्ववत्त्वं च वैधर्म्यं स्वयमेवोह्यम् इदानीं पृथि
व्यादीनां गुणाः प्रदर्श्यन्ते चतुर्दशगुणाः पृथिव्यामिति रूपादि त्रयोदश संस्कारश्च चतुर्दशगुणाः
जलस्यैते गन्धवर्जी रूपादिस्नेहान्ताः संस्कारश्च एकादशगुणास्तेजसस्तु रसगन्धगुरुत्ववर्जरूपा
दिद्रवत्वान्ताः संस्कारश्च [illegible] गुणाः वायोः तेजस्सम्बन्धवर्जस्पर्शादिपरत्वान्ताः संस्कारश्च षड्गुणा आकाशस्यैते

यथा रक्तो ऽसि
लिवात्मनिश
रीरावच्छेदेन सो
न घटावच्छेदे
न तदत्यन्ताभा
वस्यापि तत्रैव
तत्सत्त्वमितोऽधिक
रणत्वं ज्ञानेऽ
स्तीत्यर्थ ७

यि

ते

सि॰टी॰

२६

चसंख्यादिविभागाताःशब्दश्च पंचगुणाः कालदिशोंतेचसंख्यादिपंच अष्टौगुणाः परमात्मनः तेचसंख्यादि पंचबुद्धीछाप्रयत्नाश्च चतुर्दशगुणाः जीवस्यतेचसंख्यादिपंचबुध्यादिनव अष्टौगुणाः मनसः तेचसं ख्यादिपरत्वसंस्कारश्च तदुक्तं वायोर्नवैकादशतेजसोगुणाजलक्षितिप्राणभृतांचतुर्दशदिक्कालयोः पंचषडेवचांबरेमहेश्वरेऽष्टौमनसस्तथैवच २ इतिश्रीतर्के द्रव्यविशेषनिरूपणंनामद्वितीयपरिच्छे दः॥२ अथगुणान्निरूपयति चक्षुरिति रूपत्वादिवारणायगुणइति रसादिवारणायच चक्षुर्ग्राह्यइति सं ख्यादिवारणायमात्रपदं वध्यपिप्रभामिनिसंयोगवारणायगुणपदेनविशेष्यगुणास्यविवक्षणीयत यातत्रावसंख्यादिवारणंसंभवति तथापिसामाहिकद्रवत्ववारणाय तद्धावश्यकं वस्तुतस्तुप रमाणुरूपेऽव्याप्तिवारणाय चक्षुर्ग्राह्यजातिमत्वेसतिगुणत्वस्यविवक्षणीयतयाविशेष पदंनदेयमेव अणुकेतिव्याप्तिवारणायगुणपदंतुदेयमेव रूपत्वादीनिसर्वाण्येवजातय इतिबोध्यं रूपंविभजते तच्चेति रूपंचेत्यर्थः इदंचसप्तविधमित्यनेनान्वेति ननुकथंसप्तवि धमतस्तत्रहेतुमाह शुक्लेति ननुचित्ररूपेकिंमानंचित्रपटइतिप्रतीतिस्तु अनेकनीलपीतादी

ट नामेवेतिचेन्न तथासतिपटस्यप्रत्यक्षतापत्तेः बहिर्द्रव्यप्रत्यक्षेसमवायेनरूपस्यकारणत्वात् न नुरूपवत्समवेतत्वमेवबहिर्द्रव्यप्रत्यक्षेकारणमस्तुप्रकृतेरूपवान् तंतुस्तत्समवेतत्वंपटेऽप्याहते २६ मेवेतिचेन्न लाघवेनरूपस्यैवकारणत्वात् अव्याप्यवृत्तिनीलपीतादीनामनेकरूपमेवचित्ररूपम

सैवेत्यर्थः तेन द्रव्यस्याप्यणुपदादिना व्यवहारेपि न क्षतिः परममध्यमभेदेन तद्द्विविधम् तत्र परमाणुत्वह्रस्वत्वे
परमाणुमनसोः मध्यमाणुत्वह्रस्वत्वे द्व्यणुके परममहत्वदीर्घत्वे गगनादौ मध्यममहत्वदीर्घत्वे घटादावि
ति बोध्यम् एतन्मौक्तिकादिदं मौक्तिकमणिवितिव्यवहारस्यापकृष्टमहत्वाद्गौणत्वम् एवं केतनाद्व्यणुकेन
ह्रस्वमित्यत्राप्यपकृष्टदीर्घत्वाद्गौणत्वम् परिमाणं च क्वचित्संख्याजन्यं क्वचित्परिमाणजन्यं क्वचि
त् प्रचयाख्यसंयोगजन्यं तत्राद्यं परमाणुद्वित्वजन्यं द्व्यणुकबहुत्वजन्यं त्र्यणुके द्वितीयं तु कपाल
परिमाणजन्यं घटपरिमाणं तृतीयं च तूलावयवसंयोगजन्यं तूलपिण्डपरिमाणम् प्रचय एव
संयोगः शिथिल इत्यप्युच्यते इति परिमाणनिरूपणं पृथक्त्वं निरूपयति पृथगिति अयमस्मात्पृथगि
ति यो व्यवहारस्तस्य कारणं पृथक्त्वमेवेत्यर्थः तच्चैकपृथक्त्वं द्विपृथक्त्वं त्रिपृथक्त्वादिभेदेन बहुविधम्
तत्रैकपृथक्त्वं नित्यमनित्यं च नित्यगतं नित्यमनित्यगतमनित्यम् द्विपृथक्त्वादिकं तु सर्वत्रानित्यमेव
ननु भेदातिरिक्तपृथक्त्वे किं मानमिति चेन्न घटः पटो नेति प्रतीतिविलक्षणाया घटः पटात्पृथगिति
इति प्रतीतेरेव मानत्वात् संयोगनिरूपणं संयोगं निरूपयति संयुक्तेति इमौ संयुक्ताविति यो व्यवहारस्तस्य हे
तुः संयोग एवेत्यर्थः उपदिष्टलक्षणचतुष्टयेऽसाधारणपदं देयम् क्वचित्तु लक्षणे परिमाणपृथक्त्व
लक्षणेऽसाधारणपदं दृश्यते तत्राधुनिकैर्न्यस्तमिति बोध्यं स त्रिविधः अन्यतरकर्मजोभयकर्म

जसंयोगजभेदात् तत्राद्यः शकुंतशैलसंयोगः द्वितीयस्तु मेषयोः संयोगः तृतीयस्तु दर्शित एव संयोगजः
कायपुस्तकसंयोग कर्मजोपि द्विविधः अभिघातो नोदनं चेति तत्रादिमस्तु शब्दकारणीभूतः द्वितीयस्तु
क्रियादिकारणीभूतः विभागं निरूपयति संयोगनाशक इति संयोगनाशजनकगुण इत्यर्थः कालेतिव्या
प्तिवारणाय गुणपदम् नन्वीश्वरेच्छायामतिव्याप्तिः यद्यसाधारणजनको विवक्षितः तदावेगध्वंसा
दिति चेन्नैवम् क्रियायामतिव्याप्तिवारणात् तस्यावश्यकत्वात् क्रिया ततो विभागः विभागात्पूर्वदे
शसंयोगनाशः उत्तरदेशसंयोगोत्पत्तिरिति नियमेन क्रियाया अपि तज्जनकत्वात् ननु ययोः संयो
गस्तयोरेव विभाग इति नियमान्मेरुकैलाशौ विभक्तौ इति व्यवहारः कथमिति चेन्न तत्संयोगाभावा
त् विभागोपि त्रिविधः अन्यतरकर्मज उभयकर्मजो विभागजश्चेति उदाहरणं पूर्ववद्बोध्यम् विभा
गजविभागोपि द्विविधः कारणमात्रविभागजः का
रणाकारणविभागजश्चेति तत्रादिमस्तु कपालद्वयविभागात्कपालपूर्वदेशविभागः द्वितीयस्तु ह
स्तपुस्तकविभागात् कायपुस्तकविभागः तस्याश्रयमाह नवेति परत्वापरत्वे नि
रूपयति परापरेति परव्यवहारासाधारणकारणं परत्वं अपरव्यवहारासाधारणकारणम्
मपरत्वमित्यर्थः परत्वापरत्वे विभजते तदपीति द्विविधं व्युत्पादयति दिक्कृत इति दैशिकपरत्वापर

विभागानि॰

त्वे कालिकपरत्वापरत्वे चेत्यर्थः तत्र देशिकपरत्वमुदाहरति दूरस्थ इति तदुत्पत्तिक्र
मस्त्वभिहित एव तत्र दिक्पिण्डसंयोगासमवायिकारणं श्रेष्ठस्युगमं देशिकमपरत्वमुदाहरति स
मीपस्थ इति तदुत्पत्तिश्चाल्पतरमूर्तसंयोगवच्छिष्टशरीरज्ञानात् देशिकपरत्वापरत्वे मूर्तमात्रव
त्तिनी भवतः कालिकपरत्वमुदाहरति ज्येष्ठेति ज्येष्ठकालवृत्तपरत्वमिति कालिकपरत्वमित्यर्थः
तच्च ज्येष्ठत्वमेव तदुत्पत्तौ च कालपिण्डसंयोगोऽसमवायिकारणं कालिकमपरत्वमुदाहरति कनि
ष्ठेति कनिष्ठत्वमेव कालिकमपरत्वम् तदुत्पत्तिश्चाल्पतरदिवाकरक्रियाविशिष्टशरीरज्ञानात्
कालिकपरत्वापरत्वे जन्यद्रव्यमात्रवृत्तिनी भवतः गुरुत्वं निरूपयति आद्येति आद्यपतने
कर्मविशेषस्तस्यासमवायिकारणं गुरुत्वमेवेत्यर्थः द्वितीयादिपतनासमवायिकारणं वेगे गतिव्याप्ति.
या वारणायेति तच्चारतिकमात्रतोलकादिभेदेनानेकधा नित्यगतं नित्यमनित्यगतमनित्यम् द्रवत्वं
निरूपयति स्यंदनेति स्यंदनं स्रवणं तस्यासमवायिकारणम् द्रवत्वमित्यर्थः तस्याश्रयमाह पृथि
वीति तच्च जलं परमाणुभिन्नानि समितिबोध्यं द्विविधमिति द्वैविध्यं दर्शयति सांसिद्धिकमिति.
वि स्वाभाविकं सांसिद्धिकं तेजःसंयोगजन्यं नैमित्तिकमित्यर्थः तत्र सांसिद्धिकमुदाहरति सांसि

द्धिकमिति नैमित्तिकमपि पृथ्वीवीति ननु नैमित्तिकद्रवत्वस्य पृथ्वीमात्रवृत्तित्वादौ तेजसि वह्न्यादौ चाभावात्कथं पृ
थिवीतेजसोरित्यत आह पृथिव्यामिति स्नेहं निरूपयति चूर्णेति चूर्णपिष्टं तद्देवादि पिष्टस्य मृत्तिकादेः सच्चू
र्णादिस्तस्य पिण्डीभावः संयोगविशेषः तस्य हेतुर्निमित्तकारणं स्नेह एवेत्यर्थः कालादावतिव्याप्तिवारणा
य गुणपदं रूपादावतिव्याप्तिवारणाय पिण्डीभावेति चूर्णपदं स्पष्टार्थं सच नित्यगतो नित्योऽनित्यग
तोऽनित्य एवेति बोध्यम् तैलादावपि तदन्तर्गतजलभागस्यैव स्नेहः स्नेहप्रकर्षेण जलमपि दहना
नुकूलमेव शब्दं निरूपयति श्रोत्रेति शब्देऽतिव्याप्तिवारणाय गुणपदं वस्तुतस्तु श्रोत्रोत्पन्नस्या
द्यस्यैव श्रोत्रग्राह्यत्वेन तद्भिन्नेऽव्याप्तिवारणाय श्रोत्रग्राह्यजातिमत्त्वे तात्पर्यात् गुणपदम
नुपादेयमेव अथ भेर्याद्यवच्छेदेनोत्पन्नः शब्दस्य कथं श्रोत्रदेश उत्पत्तिरिति चेत् न वीचीतरङ्गन्या
येन कदम्बमुकुलन्यायेन वा तदुत्पत्तेः भेरीशब्दो मया श्रुत इति धीस्तु भ्रान्तैव अत एव भेरीजन्यतार
शब्दानुपाने शब्दः श्रुत इत्यनुभवः सांख्यविदे दांतिनो तु पृथिव्यादिपञ्चसु शब्दमिच्छन्तः स्वतं
त्रानुमेयं शब्दो भेर्यादेः शब्द इति व्यवहारात् पृथिव्यामेव शब्दमिच्छन्तीति तन्मतनिरासायेमाह आ
काशमात्रवृत्तिः तत्र युक्तिं तु प्रदर्शनेन शब्दं विभजते स च द्विविध इति भेर्यादाविति भेर्याद्यवच्छे
देनेत्यर्थः आकाशे जायमान इति शेषः आदिना वेणुवीणादेः परिग्रहः वर्णात्मकस्तु

दाद हरति वर्णात्मकं इति संस्कृतभाषादिरूप इत्येदुत्तरं सर्वेतिद्ररणीयं आदिपदेन लौकिक
भाषादेः परिग्रहः द्विविधोपि शब्दस्त्रिविधः संयोगजो विभागजः शब्दजश्चेति तत्राद्यः भेरी
घ दंडसंयोगाद्ध्वन्यात्मकः कंठसंयोगाद्वर्णात्मकः द्वितीयश्च वंशे पाट्यमाने दलद्वयविभागाद्ध्व
न्यात्मकः स चैव चटचटशब्दः आष्टद्वयविभागाद्वर्णात्मकः स च ककारादिः तृतीयश्च द्विती
यशब्दादिचरमशब्दांतः तत्र सर्वत्राकाशः समवायिकारणं भेर्याकाशसंयोगः कंठाकाश ठा.
संयोगः वंशदलाकाशविभागः ओष्ठाकाशविभागः शब्दश्च तत्तत्रासमवायिकारणं अन्यत्स
र्वं निमित्तकारणं तदुक्तम् संयोगाद्विभागाच्छब्दाच्च शब्दनिष्पत्तिरिति तन्नाशश्चोत्तरोत्त
रशब्देन अंत्यशब्दनाशश्चोपांत्यशब्दनाशेनेति बोध्यम् केचित्तु सुंदोपसुंदन्यायेनोपांत्यश
ब्देनांत्यशब्दस्यांत्यशब्देनोपांत्यशब्दस्य नाश इत्याहुः तन्न अंत्यशब्दनाशपूर्वक्षणे उपांत्यश
ब्दस्य विनष्टत्वेन तस्य कारणत्वासंभवात् ननु जैमिनीयाः सोयं ककार इति प्रत्यभिज्ञाबलाच्छब्दस्य
नित्यत्वमंगीचक्रुस्तत्कथमनित्यत्वमुपपादितमिति चेन्न तदेवेदमौषधमिति प्रतीतिवत्सारि
त्रमिप्तजात्यालंबनत्वात् अतएवोत्पन्नः ककारो विनष्टः ककार इति प्रतीतेः बुद्धिं निरूपयति सर्वे
तिं सर्वेत्यव्यवहारा [illegible] जानामीत्यनुव्यवसाय

गम्यमानत्वं बुद्धेर्लक्षणं सांख्यमते बुद्धिशब्दस्य महत्तत्ववाचकत्वादाह ज्ञानमिति बुद्धिं विभजते सेति
बुद्धिरित्यर्थः द्वैविध्यमुपपादयति स्मृतिरिति स्मृतेर्लक्षणमाह संस्कारेति संस्कारध्वंसेतिव्याप्तिवा
रणाय ज्ञानपदं अनुभवेतिव्याप्तिवारणाय संस्कारमात्रजन्यत्वं विवक्षणीयम् क्वचित्तु एवं पाठः
न चैवं तस्य संभवः तस्य संस्कारजन्यत्वेऽपि इन्द्रियार्थसन्निकर्षाजन्यत्वात् स्मृतित्वं च स्मरामीत्य
नुभवसिद्धो जातिविशेषः इति स्मृतिः अनुभवामीत्यनुभवसिद्धमनुभवत्वं प्रत्यक्षादिजातिः नन्व
नुमित्यादिसाधारणं तत् तत्तादृशप्रत्ययाभावादतोऽनुभवत्वं निर्वक्ति तद्भिन्नमिति स्मृतिभि
न्नं ज्ञानमित्यर्थः तेन यत्किंचित्स्मृतिभिन्नत्वस्य स्मृतौ सत्त्वेऽपि न क्षतिः घटादिवारणाय ज्ञानमिति स्मृ
तिवारणाय तद्भिन्नमिति अनुभवं विभजते स इति यथार्थानुभवं लक्षयति तद्वतीति तद्वति तत्प्रका
रो यस्य सः तथेत्यर्थः तद्विशेष्यकत्वे तत्प्रकारकत्व इति यावत् भवति चायं घट इति ज्ञानं घटत्ववद्घ
टविशेष्यकं घटत्वप्रकारकं च स्मृतिवारणायानुभव इति अयथार्थानुभववारणाय तद्वतीति य
त्वं थार्थ इति अनुभव इत्यनुवज्यते घटे घटं न वेत्त्यपरीक्षकः संशयेऽपि घटत्वांशे प्रमैव ननु रजते रजतत्
मिति प्रमायामव्याप्तिः तस्य रजतत्वप्रकारकत्वेऽपि विशेष्यीभूतरजते रजतस्यासत्त्वेन रजतवति विशे
ष्यकत्वाभावादिति चेत् तद्वति तत्प्रकारकत्वमित्यस्य तत्संबंधवति रजते रजतप्रकारत्वे तत्सं

प्रकारत्वमित्यर्थमनुसराम: तज्जतत्वे रजतस्यासत्वेपि रजतस्याधेयतात्मकस्य सत्वेन रजतत्वसंबंध
वति रजतत्वे रजतप्रकारत्वं तादृशं तादृशप्रमायामव्याप्तिः हतमेव ननु शास्त्रे प्रमापि स्मर्यते
सा किं यथार्थानुभवा वा बुद्धिः सैव प्रमेत्युच्यते इत्यर्थः इति यथार्थानुभवः अयथार्थानुभवं लक्षयति तद
भाववतीति तदभाववद्विशेष्यकत्वप्रकारकानुभवोऽयथार्थानुभव इत्यर्थः यथा शुक्ताविदं रजत
मिति ज्ञानं भवति हि रजतत्वाभाववच्छुक्तिविशेष्यकं रजतत्वप्रकारकं च ननु वृक्षः कपिसंयोगी
ति प्रमायामतिव्याप्तिः तस्या मूलावच्छेदेन कपिसंयोगाभाववति वृक्षे कपिसंयोगप्रकारत्वादि
ति चेन्न तदभाववत्त्वावच्छेदकावच्छेदेन तत्प्रकारकत्वमिति दर्थत्वात् तादृशप्रमायां कपिसंयोगा
भावावच्छेदकीभूतमूलावच्छेदेन कपिसंयोगप्रकारकत्वाभावेनातिव्याप्तिविरहात् अत्र मीमांसकाः अयथार्थ
ज्ञानमेवाप्रसिद्धं न च तस्याप्रसिद्धत्वे कथं शुक्तौ रजतत्वप्रकारकविसंवादी शुक्तौ पारजतार्थिनो विसंवादि प्रव
त्तिरिति वाच्यम् पुरोवर्त्तिज्ञानस्मरणाभ्यामेव तत्संभवादिति हि इदमाकिंचित्करं तथा सति नेदं रजतमिति
वाक्यज्ञानादपि प्रवृत्त्यापत्तेः उपस्थितेष्टभेदज्ञानाभावरावाविसंवादिप्रवृत्तौ चवीजमिति चेन्न सत्यरजत
स्थलेपि विशिष्टज्ञानस्य प्रवर्तकत्वस्य प्रामाणिकत्वेन लाघवात्तस्यैव सर्वत्र प्रवर्तकत्वौचित्यादित्यन्यथाख्याति
सिद्धिः वाचस्पतिमिश्रास्तु शुक्ताविदं रजतमिति ज्ञानेन प्रसिद्ध शुक्ति रजतत्वयोरलौकिक एव समवायो भासत
इत्यसत्ख्यातिमंगीचक्रुः नैतद्युक्तं असतो भानासंभवात् इति अयथार्थानुभवः यथार्थानुभवं विभजते
विशेषणविशिष्टज्ञानस्य ... ख्यातेः ... ज्ञाने इत्यर्थः

शुक्तिकाया
नेदं रजतमिति
... प्रवृत्ति
स्मरणं ४

सत्येक्कसादि
सत्यप्रवृत्तिः
सा प्रवृत्ति
अत्र सत्यप्रव
त्तौ सत्यप्रव
त्तौ ४

यथार्थानुभवेति यथार्थानुभवं प्रत्यक्षमेवेति चार्वाकाः अनुमितिरपीति कणादबौद्धौ उपमितिरपीति नैया-
यिकैकदेशिनः अर्थापत्तिरपीति प्रभाकराः अनुपलब्धिरपि भट्टवेदान्तिनौ संभवैतिह्यकावपी-
ति पौराणिकाः चेष्टापीति तान्त्रिकाः एतेषां मतेऽस्वरसस्तस्य चातुर्विध्यं स्पष्टयति स्वस्वरसबीजं तु स्फु-
टीभविष्यति चातुर्विध्ये हेतुमाह प्रत्यक्षेति इति प्रमा प्रसङ्गात्प्रमाणं विभजते तत्करणमिति यथार्थानुभ-
वात्मकप्रमायाः करणमित्यर्थः प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्षणं अनधिगतार्थगन्तृ प्रमा-
णमिति मीमांसकाः तदसत् एकस्मिन्नेव घटे घटोयं घटोयमिति धारावाहिकप्रत्यक्षे पश्चात्तनेऽधिगता-
धिगन्तृत्वादप्रामाण्यापत्तेः चातुर्विध्ये हेतुमाह प्रत्यक्षेति तथा च प्रत्यक्षानुमानोपमा-
नशब्दाः प्रमाणानीति प्रमाणत्वान्यस्य करणत्वज्ञानाधीनत्वादादौ कारणं निर्वक्ति असाधारणेति अ-
साधारणत्वं च फलायोगव्यवच्छिन्नं कारणमिति मते फलायोगव्यवच्छिन्नत्वं व्यापारवत्कारणं कर-
मते च णमिति फलायोगव्यवच्छिन्नत्वं व्यापारवत्त्वं व्यापारश्च द्रव्यान्यत्वे सति तज्जन्यत्वे सति तज्जन्य-
जनकः करणत्वस्य कारणत्वघटितत्वात्तज्जिज्ञासायां तन्निवारयितुं कारणत्वं विवेचयति कार्येति
कार्यान्नियतावश्यंभाविनी पूर्ववृत्तिः पूर्वक्षणे वृत्तिर्यस्य तत्तथेत्यर्थः अनियतरासभादिवारणाय
नियतेति कार्यकारणपूर्वेति अरूपस्य दण्डेपि स्वरूपयोग्यत्वसत्त्वाद्घटकारणतानिर्वाहः स्व-
रूपयोग्यत्वं च कारणतावच्छेदकधर्मवत्त्वं प्रकृते दण्डत्वमेव तथा इति चेद्दण्डत्वादिकारणतानियामा
पा

प्रतेनचारात्

घ

फलायोगा
वच्छिन्नत्व

सिद्धत्वनिरूपणस्यावश्यकत्वेन तत्रैव तस्मादिदं कारणत्वं संभवे नियतपदमनर्थकं स्या
वे चानन्यथासिद्धपूर्ववृत्तिकारणम् इति फलितं ननु कार्यमेव किमित्याकांक्षायामाह कार्येति
अनन्यथासिद्धत्वं चान्यथासिद्धिशून्यत्वं अन्यथासिद्धिश्चावश्यकक्लृप्तनियतपूर्ववर्त्तिन एव कार्यसंभवे तत्स
हभूतत्वं दंडत्वादौ अतस्तदन्यथासिद्धं केचित्तु अन्यत्र क्लृप्तनियतपूर्ववर्त्तिन एव कार्यसंभवे तद्भिन्नत्वम
न्यथासिद्धं यथा रूपप्रागभावशून्यस्थले क्लृप्तनियतपूर्ववर्त्तिनो गंधप्रागभावादेव पाकस्थलेपि गं
धरूपकार्यसंभवे तद्भिन्नो रूपप्रागभावो गंधप्रागभावेनान्यथासिद्ध इति वदंति तदसत् दंडत्वादे
रन्यथासिद्धत्वानापत्तेः अथ दंड एवान्यथासिद्धः किं न स्यादिति चेन्न तस्य लाघवेन कारणत्वात् त
च्च लाघवं त्रिविधं शरीरकृतं उपस्थितिकृतं संबंधकृतं च तत्राद्यं घटस्य देहमहत्त्वमनेकद्रव्यत्वापे
क्षया अनेकद्रव्यत्वं च परमाणुत्वाभावविशिष्टद्रव्यत्वं द्वितीयं गंधप्रागभावे तृतीयं दंडत्वापे
क्षयासंबद्धत्वात् त्वं घटकृतं दंडस्थलमप्रस्तुतविचारेण ननु पंचमस्यान्यथासिद्धिरेव कुतः प्रदर्शिता अन्यान्य
पि च तत्र सन्ति तत्राद्यं तु येन रूपेण पूर्ववर्त्तित्वं कारणस्य तत्त्वं यथा घटं प्रति दंडत्वस्य द्वितीया च यस्य का
रणमादायैवान्वयव्यतिरेकौ गृह्येते न तु स्वातंत्र्येण तत्त्वं यथा घटं प्रति दंडरूपस्य तृतीया च यस्यान्यं प्रति
पूर्ववर्त्तित्वं गृहीत्वैव कंचित्पूर्ववर्त्तित्वं गृह्यते तत्त्वं यथा घटं प्रति वस्याकाशस्य शब्दं प्रति समवायिकारणत्वे
न रूपेण चतुर्थी च यस्य कारणं प्रति पूर्ववर्त्तित्वं गृहीत्वैव कार्यं प्रति पूर्ववर्त्तित्वं गृह्यते तत्त्वं यथा घटं प्र

अयं शरीर
कृतं
लघुरण
घटं प्रति दं
डः संयोगसं
बंधेन कारणं
दंडत्वं तु दं
डसमवायसंबं
धेन

दंडत्वादेः
कुत्रापि
कारणताभा
वात्

गंधं प्रति गंध
प्रागभावस्येव
उपस्थितिकृत
लाघवेन तद्रूप
प्रागभावस्य

क
रः
त्व
र

ति कुलालपितृत्वेन रूपेण कुलालपितुः कुलालत्वेन रूपेण तु कारणत्वमेव तथैव चेन्न पंचम्यन्यथासिद्धे
रेव सर्वत्र संभवेन तासाम् किंचित्करत्वात् बालाधिबोधार्थमेव स्फुरतीति चेत् स्यादेतत् कारणं त्रिविधं
समवाय्यसमवायिनिमित्तभेदात् यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं यत्समवेतं यस्मि
न्समवायेन वर्तमानं सदित्यर्थः उदाहरति यथा तंतवः पटस्य पटश्च स्वगतरूपादेः स्वगतरूपादेरित्या
दिना गंधादेः परिग्रहः कार्येण कारणेन वा सह एकस्मिन्नर्थे समवेतत्वे सति कारणमसमवायिकार
णं यथा तंतुसंयोगः पटस्य तंतुरूपं पटरूपस्य ननु पटरूपं प्रति तंतुरूपमसमवायिकारणं न स्यात्
तयोः समानाधिकरण्याभावात् समानाधिकरणयोरेव कार्यकारणभावनियमात् अत आह
कारणेन वेति कार्यसमवायिकारणेन वेत्यर्थः तथा च पटरूपसमवायिकारणीभूतपटसमानाधिक
रणं यस्य तंतुरूपस्य तत्त्वात् परंपरासंबंधेन पटरूपसामानाधिकरण्यमपि तुल्यं समवेतमिति भावः परंप
रासंबंधश्च स्वसमवायि समवायसंबंधेन कार्यसामानाधिकरण्यमेव कार्यकार्यप्रत्या
सत्तिरित्युच्यते स्वसमवायिसमवायसंबंधेन कार्यसामानाधिकरण्यमेव कारणकार्यप्रत्यासत्ति
रित्युच्यते तथा च समवायस्वसमवायिसमवायान्यतरसंबंधेन कार्येण सहैकस्मिन्नर्थे समवाय कारणेन वा
न प्रत्यासन्नत्वे सति आत्मविशेषगुणान्यत्वे सति कारणमसमवायिकारणमिति फलितोर्थः न च तुरीतंतुसंयोगा
द्व्यतिव्याप्तिरिति वाच्यं तंतुमात्रसमवेतत्वे सति पटकारणं पटासमवायिकारणमिति विशेषणदानस्य विव

समवायिकारणमात्रसमवेतं

दितत्वात् एवमन्यत्रापि निमित्तकारणं लक्षयति तदुभयभिन्नंकारणंनिमित्तकारणं यथा तुरीवेमादि
दिकं पटस्य इदं च कारणत्रयं भावकार्यस्यैव अभावस्य तु निमित्तमात्रं कारणमुपसंहरति तदेतत्त्रिवि
विधकारणमध्ये यदसाधारणकारणं तदेव करणं यस्मात्कारणात्करणत्वघटकं कारणमुपदर्शि
तं तस्मात्कारणादेतत्त्रिविधकारणमध्ये यत्साधकतमं तदेव करणमित्यर्थः इति करणप्रपंचः
क[illegible]रणप्रपंचेन निरूप्य पूर्वोद्दिष्टप्रमाणविशेषाणां लक्षणं वक्तुमुपन्यस्यति तत्र प्रत्यक्षेति प्रमाकर
णं प्रत्यक्षं तत्र प्रमाणचतुष्टयमध्ये साक्षात्कारप्रमाकरणं प्रत्यक्षं प्रत्यक्षप्रमाणमित्यर्थः नैवमनुमा
नादिकारणस्यातिव्याप्तेरिति यद्यपि प्रत्यक्षादिप्रमायाः प्रथमोद्दिष्टत्वात्तस्या एवादौ लक्षणं वक्तुमुचि
तं तथापि तस्याः प्रमाणोपजीवकत्वेन तदुपजीव्यप्रमाणलक्षणमेवादावुचितमिति भावः तच्च
केचिदिंद्रियं केचिदिंद्रियार्थसन्निकर्षः क्वचि[illegible] तज्ज्ञानं तत्राद्यं निर्विकल्पकज्ञाने द्वितीयं स
विकल्पकज्ञाने. निर्विकल्पकज्ञानद्वारेंद्रियार्थसन्निकर्षः ततीयं सविकल्पकज्ञानानंतरं य
च हानोपादानोपेक्षाबुद्धयो भवंति तत्र सविकल्पकज्ञानद्वारिकं त्वनिर्विकल्पकज्ञानं हानं च
दुःखसाधनत्वज्ञानं यथा सर्पोयं दुःखसाधनमिति उपादानं च सुखसाधनत्वज्ञानं यथा

सविकल्पकज्ञाने [illegible] निर्विकल्पकज्ञानं करणं

सविकल्पकज्ञानद्वारा

इति

स्रक्चन्दनवनितादिकं मत्सुखसाधनमिति उपेक्षा चेदभ्यस्तादशनत्वाभावस्थाने यथा तृणादौ लिङ्गव्यापारवतः

मतं करणत्ववादिनः इति प्रत्यक्षप्रमाणनिरूपणम् प्रत्यक्षप्रमां लक्षयति इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्र

त्यक्षं इन्द्रियं चक्षुरादिकम् अर्थो घटादिः तयोः सन्निकर्षः संयोगादिस्तज्जन्यं ज्ञानमित्यर्थः सन्निकर्षध्वं

सवारणाय ज्ञानमिति अनुमित्यादिवारणायेन्द्रियार्थसन्निकर्षेति अथ काचादिव्यवहितपदार्थ उपनेत्रादि

प्रत्यक्षेऽव्याप्तिरिति चेन्न स्वच्छद्रव्यस्य तेजोऽनिरोधकत्वेन तदन्तश्चक्षुषः प्रवेशसम्भवात् अथ द

र्पणे कथं मुखप्रत्यक्षमिति चेन्न दर्पणप्रतिहतचक्षुषैव परावृत्त्या मुखं प्राप्य प्रत्यक्षजननात् कचित्तु

स्वच्छद्रव्यस्यैव दोषवशादन्यथाभानं दर्पणे मुखं पश्यामीति धीरनुभवमात्रेण तेन प्रतिबिम्बप्रत्यक्षे रे

न चेश्वरप्रत्यक्षेऽव्याप्तिरिति वाच्यम् अत्र जन्यप्रत्यक्षस्यैव लक्षितत्वात् यदाह भगवान् सूत्रका ज्ञानस्क

रः इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारि व्यवसायात्मकं प्रत्यक्षमिति अन्ये तु ज्ञानाकर रणं प्रत्य

णकं ज्ञानं प्रत्यक्षं इदं चेश्वरप्रत्यक्षसाधारणमिति इति प्रत्यक्षप्रमासामान्यनिरूपणं प्रत्यक्ष तज्ज्ञानाक रणकं

द् प्रमां निरूपयति तद्द्विविधं निर्विकल्पकं सविकल्पकं च निष्प्रकारकं ज्ञानं निर्विकल्पकं नि

ष्प्रकारकं नाम जात्यादियोजनाहीनं वस्तुमात्रावगाहि ज्ञानमित्यर्थः ननु निर्विकल्पके किं मा

नमिति चेन्न अयं घट इति विशिष्टबुद्धिर्विशेषणज्ञानजन्या विशिष्टबुद्धित्वात् दण्डीति विशिष्ट

वह्निवदित्यनुमानस्यैव हेतुत्वात् अत्र घटत्वस्वरूपविशेषणं तत्र ज्ञानमेव निर्विकल्पकमित्युच्यते
न च विशेषणज्ञानमपि सविकल्पकमेवास्त्विति वाच्यं अनवस्थाप्रसंगात् इति निर्विकल्पकम्
सप्रकारकं ज्ञानं सविकल्पकम् विशिष्टज्ञानमित्यर्थः यथा डित्थोऽयं ब्राह्मणोऽयं श्यामोऽयमिति
अत्र नास्तिकाः सविकल्पकं न प्रत्यक्षं तस्य घटत्वादिरूपालीकोपरक्तत्वात् वंध्यापुत्रज्ञा
नवत् निर्विकल्पकं स्वलक्षणवस्तूपरक्तत्वात्प्रत्यक्षमेव प्रत्यक्षं न च तर्हि किं मुक्तानीपो घटोऽयं
घटोऽयमित्येकाकारप्रतीतिर्भिन्नेषु विलक्षणेषु घटेषु अतः सर्वानुगतधर्माभावप्रयोजकं इति वा
च्यं तस्यात् द्व्याकारत्वात्मकत्वात् अतद्व्यावृत्तिरतद्भेदः स च तुच्छ एवेत्याहुः तदसत् विधि
मुखेनैवाकारप्रतीतेः तस्य निषेधरूपत्वायोगात् इति सविकल्पकं तच्च प्रत्यक्षं षड्विधं घ्राणजर
सनचाक्षुषश्रोत्रस्पार्शनमानसभेदात् घ्राणजत्वादिकं तु जिघ्रामि आस्वादयामि पश्यामि शृणो
मि स्पृशामि मनसा सुखं साक्षात्करोमीत्यनुभवसाक्षिको जातिविशेषः इति प्रत्यक्षप्र
माविभागः ननु प्रत्यक्षकारणीभूतेन्द्रियनिष्ठप्रत्यक्षसामानाधिकरण्यपकटकसन्निकर्षः कइत्याकां
क्षायां तद्दर्शयितुं विभजते प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः संयोगः संयुक्तसमवा
यः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेषणविशेष्यभावश्चेति प्रत्यक्षेति

मिथ्यावस्तु परक्तत्वाभ्युपगमात ५ का
सर्वानुगत धर्मस्य का

सविकल्पस्य मिथ्यात्वकृते
न

ति॰ त॰
३५

लौकिकप्रत्यक्षेत्यर्थः संयोगमुदाहरति चक्षुषा घटप्रत्यक्षजनने संयोगः तथा च द्रव्यचाक्षुषस्पा
र्शनेमानसेषु संयोगो वा सन्निकर्ष इति भावः संयुक्तसमवायमुदाहरति घटरूपप्रत्यक्षे संयु
क्तसमवायः चक्षुषा जननीय इत्यनुषज्यते तथा च द्रव्यसमवेतचाक्षुषस्पार्शनमानसघ्राण
जरासनेषु संयुक्तसमवाय एव सन्निकर्ष इति भावः संयुक्तसमवायो ननु घटरूपे कथं चक्षुषः
संयुक्तसमवायः अत एतमुपपादयति चक्षुःसंयुक्ते घटे रूपस्य समवायात् ननु दूरस्थघटादेरा
सपि संयुक्तसमवायः कुतः परिमाणाग्रहणमिति चेदत्राहुः परिमाणग्रहणे चक्षुःसंयुक्तस
न्निकर्षोऽप्यधिकं कारणं स चेन्द्रियावयवावयवेन्द्रियावयवयोरिन्द्रियावयवावयविनोरिन्द्रि
यावयवावयवावयविनोरिन्द्रियावयवावयवयोः संयोग इति इतरे तु दोषवशान्नग्रहणमि
ति वदन्ति संयुक्तसमवेतसमवायमुदाहरति रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवा
यसन्निकर्षः चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य समवायात् रूपत्वसामान्यप्रत्यक्षमिति रूपत्वा
त्मकं यत्सामान्यं तत्प्रत्यक्षेत्यर्थः अत्रापि चक्षुषा जननीय इत्यनुवर्त्तते तथा च द्रव्यसमवेतस
मवायसन्निकर्षोऽस्त्विति चेन्न तत् आत्मनोऽनध्यक्षप्रसंगात् समवायसन्निकर्षमुदाहरति श्रो
त्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः शब्दसाक्षात्कारे जननीय इति भावः ननु

शिव
३५

श्रोत्रशब्दयोः कथं समवायः इत्यपेक्षायां प्रसंगादायति कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात् श-
ब्दस्याकाशगुणत्वात् गुणगुणिनोश्च समवायात् न च समवायस्य नित्यत्वेन शब्दप्रत्यक्षे को व्यापार
इति चेत् शब्दः श्रोत्रमनःसंयोग एवेति गृहाण समवेतसमवायमुदाहरति शब्दत्वसाक्षात्कारे
समवेतसमवायः सन्निकर्षः श्रोत्रसमवेतशब्दे शब्दत्वसमवायात् विशेषणविशेष्यभा
वमुदाहरति अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः विशेषणाभावो विशेष्यभा
वश्चार्थः इन्द्रियसंबद्धविशेषणत्वमिन्द्रियसंबद्धविशेष्यत्वमिति यावत् विशेषणता
सन्निकर्षमुदाहरति घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्तभूतले घटाभावस्य विशेषण
त्वात् इह भूतले घटो नास्तीत्यादौ विशेष्यतासन्निकर्षोऽप्यवसेयः सप्तम्यन्तस्य विशेषण
त्वनियमात् अत्रेदं बोध्यं इन्द्रियसंयुक्तविशेषणतासंयुक्तविशेष्यताद्यभेदेन नानात्वे
नापि विशेषणतात्वेनैकैव एवं विशेषणताविशेष्यत्वयोश्चान्यतरत्वेन ग्रहणमतो न सन्नि
कर्षषट्कत्वविरोधः इति लौकिकसन्निकर्षः ननु विशेषणतासन्निकर्ष एव नास्ति अत्र तदा
भावप्रत्यक्षे योग्यानुपलब्धिः करणमिति चेन्न यद्यत्र घटः स्यात्तर्हि भूतलमिव दृश्येतातो
दर्शनाभावान्नास्तीति घटस्वरूपप्रतियोगि [illegible] तर्कितायाः घटाभावं भूतलं [illegible] इति योगी

त्वाकाभावात्मकयोग्यानुपलब्धिसहकृतेन्द्रियेणैवाभावप्रत्यक्षसंभवेऽनुपलब्धेः करणत्वस्यान्याय्यत्वात् नन्व
भावाधिकरणप्रत्यक्षे प्रतियोगिविशेषणतासन्निकर्षद्वारा तस्यैव करणत्वस्योचितत्वादित्यलं विस्तरः
इत्युक्तत्वाच्च: इदानीमलौकिकसन्निकर्षो निरूप्यते स त्रिविधः सामान्यलक्षणो ज्ञानलक्षणो योगज
धर्मलक्षणश्चेति तत्राद्य इन्द्रियसंबद्धविशेष्यकज्ञानप्रकारीभूत घटत्वादिः भवतीति च घटत्वादि
रिन्द्रियसंबद्धविशेष्यकेऽयं घट इति लौकिकप्रत्यक्षे प्रकारस्तदनन्तरं तेन सन्निकर्षेण सर्वे घटा
इत्यलौकिकप्रत्यक्षं जन्यते न चेन्द्रियसंबद्धं सामान्यमेव प्रत्यासत्तिः मृगतृष्णादौ जलत्वभ्रमानन्तरं
जलत्वज्ञानं न स्यात् तत्रेन्द्रियजलत्वयोः संबंधाभावात् मानसस्थले तु ज्ञानप्रकारीभूतं सामान्य
मेव प्रत्यासत्तिः अन्यथा परमाणुत्वेन यत्किंचित्परमाणुप्रत्यक्षे जाते परमाणुत्वसामान्यलक्षणया स
कलपरमाणुगोचरमानसप्रतीतिर्न स्यात् परमाणुमनसोः संबंधाभावात् द्वितीयो यथा यत्र सौर
भज्ञानलक्षणया चाक्षुषसामग्र्या च सुरभि चन्दनखण्डमिति सौरभांशेऽलौकिकं चन्दनखण्डांशे
लौकिकं चाक्षुषं जायते तत्र सौरभज्ञानेन सौरभस्मरणमेव प्रत्यासत्तिः सौरभांशे चक्षुःसन्निक
र्षासंभवादित्याद्यन्यत्र विस्तरः तृतीयस्तु अदृष्टविशेषरूप एव स द्विविधः युक्तयुञ्जानभेदाद्योगि
नो द्वैविध्यात् तत्र युक्तस्य योगिनः प्रथमप्रत्यासत्त्या निरन्तरमखिलपदार्थज्ञानं जायते युञ्जानस्य

इदं जलं इ
ति स्थलीय
ज्ञाने जलत्व
स्य इन्द्रियसं
बद्धत्वं नास्ति
प्रकारत्वमस्ति

चिंताविशेषसनाथइतिनीयप्रत्यासत्त्यासमयविशेषज्ञानंजायते इत्यलौकिकसन्निकर्षः ननुयोगिसद्भावेकिं
मानमितिचेत् परमाण्वादिर्जन्यप्रत्यक्षविषयोऽभिधेयत्वात् घटवदित्यनुमानंग्रहाण तत्प्रत्यक्षंतुना
स्माकंकिंतुयोगिनामेवेतिध्येयम् प्रत्यक्षप्रमामुपसंहरति एवंसन्निकर्षजन्यंज्ञानंप्रत्यक्षंअप्र
तिक्रमेणेत्यर्थः ननुसिद्धांतेप्रत्यक्षज्ञानकरणमिंद्रियार्थसन्निकर्षःकिंनस्यादतआह तत्कर
णमिंद्रियम् प्रत्यक्षप्रमाणंनिगमयति तस्मात्प्रत्यक्षप्रमाणमिन्द्रियमिति सिद्धांतेसिद्धमित्य
इति र्थः प्रत्यक्षप्रमाणम् प्रत्यक्षानुमानयोरुपजीव्योपजीवकभावसंगतिंमत्वाप्रत्यक्षानंत
रमनुमानंनिरूपयति अनुमितिकरणमनुमानं अनुमितेःकरणमनुमानमित्यर्थः तच्चलिंग
परामर्शएवेतिनिवेदयिष्यति अथानुमितिःकेत्यतआह परामर्शजन्यंज्ञानमनुमितिः प्रत्य
क्षादिकारणजन्यांत परामर्शध्वंसवारणायविशेष्य तथापिपरामर्शप्रत्यक्षेऽतिप्रसक्तिरि
तिचेन्नैवं साध्यनावगाहित्वेन नापिविशेषणीयत्वात् नचतथापिधूमवान्पर्वतोवह्निमा
नित्याकारकः लिंगोपहितलैङ्गिकभानात्मकानुमितावव्याप्तिरितिवाच्यं तादृशानुमितेरस्वीकारा ते
त् ननुस्थाणुर्वापुरुषोवेतिसंशयानंतरंपुरुषत्वव्यापककरादिमानयमितिविशेषदर्शनेसत्य
यंपुरुषएवेतिप्रत्यक्षोदयान्नातिव्याप्तिरितिचेन्नसमानविषयकप्रत्यक्षेविशेष्यसामग्र्यभावसह
...सामग्रीचतस्याअभाव

विशेषत
७६

वह्निव्याप्यधूमवानयं पर्वतः पर्वतो वह्निमान् यत्र वह्निव्याप्यो धूमः

पक्षधर्मता

कृतपरामर्शजन्यत्वस्यैव विवक्षितत्वात् सा च पक्षविशेष्यकपरामर्शात् पक्षविशेष्यकं पक्षप्रका
रकपरामर्शात् पक्षप्रकारिका द्विविधादपि परामर्शात् पक्षविशेष्यकैव [illegible] केवलात्तादृशस्य
रः इत्यनुमितिः ननु कः परामर्शः कस्तत्त्वनिर्वाहि व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः वि
षयतासंबंधेन व्याप्तिविशिष्टपक्षधर्मताज्ञानं तदेव परामर्श इत्यर्थः उदाहरति यथा वह्निव्या
प्यधूमवान्पर्वत इति ज्ञानं परामर्शः तथा च वह्निव्याप्यत्वरूपव्याप्तेर्भानाद्धूमवानित्यत्र पक्षधर्म
ताया भानाद्भवत्येव व्याप्तिविषयकं पक्षधर्मताविषयकं चेति भावः ननु तावता परामर्शस्वरू
पस्य जन्यत्वघटितत्वादनुमितिः कीदृशी इत्यत आह तज्जन्यं पर्वतो वह्नि
मानिति ज्ञानमनुमितिः परामर्शजन्यमित्यर्थः इति परामर्शनिः [illegible] व्याप्तिविशिष्टत्वरूपा का व्या
प्तिरित्याकांक्षायामाह यत्र धूमस्तत्राग्निरिति साहचर्यनियमो व्याप्तिः यत्र धूमस्तत्राग्निरिति
व्याप्तेरभिनयः साहचर्यनियम इति लक्षणं सहचरतीति सहचरस्तस्य भावः साहचर्यं सामा
नाधिकरण्यमित्यर्थः तस्य नियमो व्याप्तिः सव्यभिचारितत्वे तद्व्यभिचाराभावः व्यभिचारस्तु साध्या
भाववद्वृत्तित्वं तथा च साध्याभाववदवृत्तित्वं व्याप्तिरिति पर्यवसन्नं वह्निमान् धूमादित्यादौ सा
ध्याभावः [illegible] धूमस्तदभाववदवृत्तित्वं [illegible] इति लक्षणमेव [illegible] नांतिव्याप्तिः ननु
साध्यो वह्निस्तदभाववान् [illegible] मन्यताम्

व्याप्

अत्र घटोऽस्ति परं तु पटत्वविशिष्टो घटो नास्ति इति व्याधिकरणधर्मावच्छिन्नाभावः

वाच्यं ज्ञेयत्वादित्यादौ साध्याभावाप्रसिद्ध्याऽव्याप्तिः नच संदडोपधमयोर्व्याधिकरणधर्मावच्छिन्नप्रतियो
गिताकाभावस्योपगमेन तत्र वाच्यत्वेन वाच्यत्वाभावस्य समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्या
प्रसिद्धत्वेपि घटत्वेन वाच्यत्वाभावस्य व्याधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य प्रसिद्धत्वेन कथमव्याप्ति
रिति वाच्यं चिंतामणिकारेण तस्य खंडितत्वात् अंगीकारपक्षेपि तद्दूषणं इति लक्ष्याप्रसिद्धेः प्रकृते तस्यानु
पयोगाच्चेति चेन्न केवलान्वयिन्यनुमितेरस्वीकारात् स्वीकारे तु अन्यमात्मिकैव सेति नव्याः अत्रोच्यते हेतु
सामानाधिकरण्यात्यंताभावाप्रतियोगि साध्यसामानाधिकरण्यं व्याप्तिः वह्निमान्धूमादित्यत्र हेतुर्धूम तु
स्तत्सामानाधिकरणात्यन्ताभावो घटात्यन्ताभावस्तत्प्रतियोगी घटोऽप्रतियोगि वह्निरूपसाध्यं
तत्सामानाधिकरण्यं धूमे इति लक्षणसमन्वयः धूमवान्वह्नेरिति अत्र नातिव्याप्तिः हेतुर्वह्निस्त
त्सामानाधिकरणात्यन्ताभावो योगोलके धूमात्यंताभावस्तत्प्रतियोगि धूमरूपसाध्यमिति ना
तिव्याप्तिः इदं वाच्यं ज्ञेयत्वादित्यादौ हेतुर्ज्ञेयत्वं तत्सामानाधिकरणात्यंताभावो घटत्वाभाव
स्तत्प्रतियोगी घटत्वं अप्रतियोगि वाच्यत्वरूपं साध्यं तत्सामानाधिकरण्यं ज्ञेयत्वे इति कृत्वा नाव्याप्तिः
अथ कपिसंयोगी एतद्वृक्षत्वादित्यत्र हेतुरेतद्वृक्षत्वं तत्सामानाधिकरणात्यन्ताभावो मूलावच्छे
देन कपिसंयोगात्यंताभावः [illegible] इति [illegible] प्रतियोगी

व्याधिकरणधर्मावच्छिन्नाभावस्य

क व्याधिकरणधर्मावच्छिन्नाभावस्तु [illegible]

सहचारज्ञानेपि वन्ह्यादौ व्यभिचारोपलंभेन कथमिदं व्याप्तिग्राहकमिति चेन्न ४

सि॰ त॰ ९

प्तिकरणाद्धेतुसामानाधिकरण्याभावस्याभिमतत्वादि सत्वे तर्ककर्कशविचारेणावालानो इति व्याप्तिः ननु ज्ञातेपि व्या-
प्तिः परं तु पक्षधर्मतेत्यत्र कानाम पक्षधर्मतेत्यपेक्षा मारां प्रतिपक्षधर्मतास्वरूपं निरूपयति व्याप्यस्य पर्वता-
दिवृत्तित्वं पक्षधर्मता व्याप्यो नाम व्याप्त्याश्रयः स च धूमादिरेव तस्य पर्वतादिनिरूपितवृत्तित्वं पक्ष-
धर्मतेत्यर्थः इति पक्षधर्मता अथ कथमनुमानमनुमितिकरणं कथं वा तस्मादनुमितेर्जनिरिति
जिज्ञासायां लाघवादनुमानमुखेनैव वोधयितुमनुमानं विभजते अनुमानं द्विविधं स्वार्थं परार्थं
चेति स्वस्यार्थः प्रयोजनं यस्मात्तत्स्वार्थं इति समासः स्वप्रयोजनं च स्वस्यानुमेयपदार्थप्रतिपत्तिः स्वा-

समासःक
दलीयः

र्थपरार्थमित्यस्यापीदमेव तात्पर्यं मनसि निधाय स्वार्थानुमानं लक्षयति स्वार्थं स्वानुमितिहेतुः
तदेवोपपादयितुमुपक्रमं करोति तथाहि स्वयमेव भूयोदर्शनेन यत्र धूमस्तत्राग्निरिति महानसा-
दौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतः भूयोदर्शनेनेति धूमाग्न्योर्व्याप्तिग्रहे साध्यसाधनयोर्भूयः स-
हचारदर्शनेन ननु पार्थिवत्वलोहलेख्यत्वादौ शतशः सहचारज्ञानपदेन व्यभिचारज्ञानविरहस-

त

हकृतसहचारज्ञानस्यैवाभिमतत्वात् व्यभिचारज्ञानं द्विविधं यथार्थमयथार्थं च तदपि द्विविधं
निश्चयः शंका चेति तद्विरहश्च क्वचित्तर्कात् यथा धूमाग्न्योर्व्याप्तिग्रहे धूमो वह्निव्यभिचारी नवेति
शंकायां धूमो वह्निव्यभिचारीति निश्चये वा यदि धूमो वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादि

३८

तिधूमाग्न्योः कार्यकारणभावभंगप्रसंगरूपस्तर्को यदि भवति तदेतस्मादेव तर्काद्व्यभिचारज्ञानं निवर्त्त
ते अतस्तत्र तर्कादेव व्यभिचारज्ञानविरहः क्वचित्स्वतः सिद्धएवपथ्यापदानं धूमे व्यभिचारज्ञा
नं तस्य यत्र धूमस्तत्राग्निरस्तीति धूमत्वावच्छिन्ने अग्नित्वावच्छिन्नव्याप्तिरित्यर्थः ननु देशान्तरीय
वह्निधूमयोरिन्द्रियसन्निकर्षासंभवेन कथं धूमसामान्ये वह्निसामान्यव्याप्तिग्रह इति चे
न धूमत्वं वह्नित्वरूपसामान्यलक्षणप्रत्यासत्त्यैव सकलधूमवह्निज्ञानसंभवेन तत्र
व्याप्तिग्रहस्याविसंभवात् महानसादाविति महानसाद्यवच्छेदेन धूम इत्यर्थः तदुक्तं चा
ग्नोहंदिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति यत्र यत्र धूमस्तत्र तत्राग्निरिति स पर्वत
गते च ननु परामर्शात्प्रति व्याप्तिज्ञानस्य कारणत्वेन तत्सर्वदा तो पर्व[illegible]तादेऽमहानसा
द्यवच्छेदेन गृहीतव्याप्तेः कथं ज्ञानमत आह व्याप्तिं स्मरतीति तथा च धूमदर्शनरू
पोद्बोधकवत्त्वात् व्याप्तिस्मरणं भवत्येव तदनन्तरं वह्निव्याप्य धूमवान्पर्वत इति ज्ञा
नमुसंभवते व्याप्तिस्मरणानन्तरं तृतीयो इत्यर्थः अयमेव लिंगपरामर्श इत्युच्यते व्याप्तिबलेनार्थं गमयति लीन
इति लिंगं तच्च धूमादिस्तस्य परामर्शो ज्ञानविशेष इत्यर्थः तस्मात्पर्वतो वह्निमानिति ज्ञानमनुमि
तिरूपं जायते लिंगपरामर्शादित्यर्थः स्वार्थानुमानमुपसंहरति तदेतत्स्वार्थानुमाने अंगस्यात्कारणार

त० दी
३८

इत्यस्यैव

तुच्छपर्यौरेतु
त्र्यर्थेनेश्रीति
रैभ्राननुरा
वैसपिपंचाव
यवाक्य ६
व

त् इदं स्वप्रतिपत्तिहेतुत्वस्मात्कारणादेव तत्स्वार्थानुमानमित्यर्थः इति स्वार्थानुमानं क्रमप्राप्तं परा
र्थानुमानं निरूपयति यत्तु स्वयं धूमादग्निमनुमाय परप्रतिपत्यर्थं पंचावयववाक्यं प्रयुज्यते तत्परा
र्थानुमानं यत्पंचावयववाक्यं तत्परार्थानुमानमिति संबंधः अवयवत्वं नाम द्रव्यसमवा
यिकारणत्वं प्रतिज्ञादिषु तदसंभवात् कथमेतेऽवयवाः स्युरिति चेत् अनुमानवाक्यैक
देशत्वानुमानत्वमेव न विचारसहं तस्य लिंगपरामर्शत्वाभावादिति चेत् तु एवं लिंगपरा
मर्शप्रयोजकलिंगप्रतिपादकत्वेनानुमानमित्युपचारात् तदुदाहरति यथा पर्वतो
ग्निमान्धूमात् यो यो धूमवान्स सोऽग्निमान् यथा महानसं तथा चायमिति अयं च पर्व
तस्तथा वह्निव्याप्यधूमवानित्यर्थः तस्मात्तथा वह्निव्याप्यधूमवत्त्वाद्वह्निमानित्यर्थः
अनेन प्रतिपादितात् लिंगात्परोऽप्यग्निं प्रतिपद्यते अनेन पंचावयववाक्येनेत्यर्थः इति प
रार्थानुमानं ननु पंचावयववाक्यमित्युक्तं के ते पंचावयवाः अतस्तान्दर्शयति प्रतिज्ञा
हेतूदाहरणोपनयनिगमनानि पंचावयवाः प्रतिज्ञाद्यन्यतमत्वमवयवत्वं साध्यवि ध्य
शिष्टपक्षबोधकवचनं प्रतिज्ञा पंचम्यंतं तृतीयांतं वा लिंगवचनं हेतुः व्याप्तिप्रतिपाद
कं दृष्टांतवचनमुदाहरणं उदाहृतव्याप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकं वचन

मुपनयः पक्षे साध्यस्याबाधितत्वप्रतिपादकवचनं निगमनं इदमेव लक्षणं ह। दिनिर्धारप्रतीत्यादीन्विशि
ष्य दर्शयति पर्वतोऽग्निमानिति प्रतिज्ञा धूमवत्त्वादिति हेतुः यो यो धूमवानित्युदाहरणं तथा चा
यमित्युपनयः तस्मात्तथेति निगमनम् इति अवयवग्रंथः [illegible] ज्ञायमानं लिंगमनुमितिक
रणमिति वृद्धोक्तं न युक्तं इत्याह [illegible] प्राल्लावह्निमत्यतीतधूमादित्यादौ लिंगाभावेऽप्यनुमितिदर्श
नादित्याभिप्रायवान् लिंग परामर्श एव करणमिति व्याचष्टे स्वार्थानुमितिपरार्थानुमित्योर्लिंगपराम
र्श एव करणं अनुमानमुपसंहरति तस्माल्लिंगपरामर्शोऽनुमानं अनुमितिकरणत्वादित्यर्थः अ नु
यमेव तृतीयज्ञानमित्युच्यते तथा हि महानसादौ धूमाग्न्योर्व्याप्तौ गृह्यमाणायां पक्षे धूमस्य ज्ञा
नृ नं तदादिमम् पक्षे यद्धूमज्ञानं तद् द्वितीयं अत्रैव वह्निव्याप्यत्वेन यद्धूमज्ञानं तत्तृतीयम् इदमेव लिंग
परामर्श इत्युच्यते मीमांसकास्तु धूमवान् पर्वत इति पक्षधर्मताज्ञानमयं च वह्निव्याप्यो धूम इति
व्याप्तिस्मरणमेतदुभयमेवानुमितिकरणं न तु लिंगपरामर्शोऽपि गौरवादित्याहुः तन्न द्रव्यवान् पर्वतो म
धूमो वह्निव्याप्य इति ज्ञानद्वयादनुमित्यापत्तेः द्रव्यत्वेन रूपेण धूमस्यैव भानात् ननु व्याप्यताव
च्छेदकरूपेणैव हेतोः पक्षवृत्तित्वज्ञानं विवक्षितमिति मा वद व्याप्यतावच्छेदकाननुसंधानेऽपि वह्नि
वा व्याप्यवान् पर्वत इति शाब्दज्ञाने शाब्दपरामर्शादनुमित्यनुपपत्तेः व्यापारवत्कारणं करणमिति मते

व्याप्तिज्ञानमेवानुमाने लिंगपरामर्शो व्यापार इत्यवसेयं इत्यनुमानोपसंहारः लिंगं विभजते लिंगं त्रिविधं अन्वयव्य
तिरेकि केवलान्वयि केवलव्यतिरेकि चेति अन्वयव्यतिरेकिणो लक्षणमाह अन्वयेन व्यतिरेकेण च व्या
प्तिमदन्वयव्यतिरेकि तृतीयायाः प्रयोज्यत्वमर्थः साध्यसाधनयोः साहचर्यमन्वयः तदभावयोः सा
हचर्यं व्यतिरेकः तथा चान्वयप्रयोज्यव्याप्तिमद्व्यतिरेकप्रयोज्यव्याप्तिमदन्वयव्यतिरेकीत्यर्थः उदाहर
ति यथा वह्नौ साध्ये धूमवत्वं धूमवत्त्वात्मकं लिंगमित्यर्थः ननु कथमत्रान्वयव्याप्तिर्व्यतिरेकव्याप्तिश्च अत तत्क्रमे
णाभिनयति यत्र धूमस्तत्राग्निरित्यन्वयव्याप्तिः यत्र वह्निर्नास्ति न तत्र धूम इति व्यतिरेकव्याप्तिः तथा चान्वयव्या
प्तिरुपदर्शितैव व्यतिरेकव्याप्तिश्च साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यवसेयमिति भावः केचित्तु सा
ध्याभावसाधनाभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः अन्यनिष्ठव्याप्त्या कथं साधनादनुमितिरिति चेत् साध्याभाव
ति व्यापकीभूताभावयोर्व्याप्तिर्व्यतिरेकप्रतियोगित्वेन साधनस्य पक्षवृत्तित्वज्ञानं सहकारि तदुक्तं व्याप्यव्यापकभा
वो हि भावयोर्यादृगिष्यते तयोरभावयोस्तस्माद्विपरीतः प्रतीयते अन्वये साधकं व्याप्यं साध्यं व्यापकमि
ष्यते साध्याभावोऽन्यथा व्याप्यो व्यापकः साधनात्ययः इत्याहुः दृष्टान्तं दर्शयति यथा महानसे यद्यप्यन्व
यव्याप्तेः पूर्वं दर्शितत्वात्पुनस्तद्दर्शनमनुचितं तथापि तदानीं तस्याप्तत्वेनाप्रदर्शितत्वान्न दोषः इत्यन्वय
व्यतिरेकि केवलान्वयिनो लक्षणमाह अन्वयमात्रव्याप्तिकं केवलान्वयि अन्वयेनैव व्याप्तिर्यस्मिन्स्तत्तथा

इति उदाहरति यथा घटोऽभिधेयः प्रमेयत्वात् पटवदिति प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिं निराकरोति प्रमेय-
त्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति अभिधेयत्वसाधकेऽनुमानेऽस्यार्थः ननु कुतस्तन्निषेधोऽतस्तत्र हेतुमाह
सर्वस्य प्रमेयत्वादभिधेयत्वाच्च पदार्थमात्रस्येत्यर्थः तथा च सकलपदार्थाभिधेयत्वस्येश्वरप्रमाविषयत्व
स्य चात्यन्ताभावाप्रतियोगित्वरूपं केवलान्वयित्वेन तदभावाप्रसिद्ध्या तद्घटितव्यतिरेकव्याप्तिर्न संभ
वत्येवेति भावः इति केवलान्वयि केवलव्यतिरेकिणो लक्षणमाह व्यतिरेकमात्रव्याप्तिकं केवल
मि व्यतिरेकि पूर्ववत्समाप्तः उदाहरति यथा पृथिवीतरेभ्यो भिद्यते गंधवत्वात् यदितरेभ्यो न भिद्यते न
तद्गंधवत् यथा जलं न चेयं तथा तस्मान्न तथा इयं पृथिवी न तथा न गंधाभाववतीत्यर्थः तस्मान्न तथे
य तिगंधाभावाभाववत्वात् तदितरभेदाभाववतीत्यर्थः नन्वत्र किमिति नान्वयव्याप्तिरित्याशंक्य परिहरति अ
त्र यत् गंधवत् तदितरभिन्नमित्यन्वयदृष्टांतो नास्ति पृथिवीमात्रस्य पक्षत्वात् अत्र इतरभेदसाध्यका
नुमाने इदमुपलक्षणं जीवच्छरीरं सात्मकं प्राणादिमत्वात् यन्नैवं तन्नैवं यथा घटः प्रत्यक्षादिकं प्र
माणं प्रमाकरणत्वात् यन्नैवं तन्नैवं यथा प्रत्यक्षाभासः विवादास्पदमाकाशमिति व्यवहर्तव्यं शब्दव ७३
त्वादित्यादिकमपि केवलव्यतिरेकि इति द्रष्टव्यं अथेतरभेदः प्रसिद्धो न वा नाद्यः यत्र प्रसिद्धस्तत्र
गंधवत्वस्यापि सत्वेन तदधिकरणस्यैवान्वयदृष्टांतत्वेन केवलव्यतिरेकित्वव्याघातात् यदि तत्रा

नं.८१०

लिंगं धवलत्वं तदा तस्यासाधारणत्वापत्तिः न द्वितीयः विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वेन पृथिवीतरभेद
वत्त्वीति साध्यविशिष्टानुमित्युत्पत्तेः विशेषणीभूतेतरभेदस्याप्रसिद्धत्वात् ज्ञानस्याप्यप्रसिद्धेः न च के
वलमिदमेव दूषणं व्यतिरेकव्याप्तिज्ञानस्याप्यसंभवेन दूषणांतरस्यापि जागरूकत्वात् क्व तदसंभव
इति चेन्न तज्जनकेतरभेदाभावज्ञानस्यायोगात् सत्त्वकृत इति चेन्न तादृशज्ञानकारणीभूतेतरभेद
ज्ञानाप्रसिद्धेः न च वक्तव्यं कथं तत्र कारणमिति अभावज्ञाने प्रतियोगिज्ञानस्य कारणत्वादिति भाव
इ गर्वम् जलभेदस्य तेजसि तेजोभेदस्य जले इतरीत्येतरभेदस्य प्रत्येकमाधिकरणाप्रसिद्ध्या पृथि
व्यां तत्पटलस्य साधनीयत्वात् विशिष्टानुमितिसंभवात् सुतरां व्यतिरेकव्याप्तिज्ञानमपि संभवति
इतरभेदघटपटत्वस्य पक्षादारिते प्रसिद्धत्वेन नान्वयदृष्टांतस्य अतएव नासाधारण्यमपीति केवलपक्ष अत्र
वितेन अत्रेदं बोध्यम् अन्वयव्यतिरेकितु पंचरूपोपपन्नम् तानि कानीति चेत् रूपता पक्षधर्मत्वं सप
क्षेसत्वं विपक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वं चेति अबाधितः साध्यरूपविषयो य
स्य तत्ताघातस्य भावस्तत्वम् साध्याभावसाधकं हेत्वंतरं सत्प्रतिपक्ष इत्युच्यते सत्प्रतिपक्षविलिप
सत्प्रतिपक्षतोऽस्त्वप्रतिपक्षस्याभावस्तत्वमिति बोध्यम् केवलान्वयितु चतुरूपोपपन्नमेव असत्त्वा
ध्यंसाधयितुं मते तस्य विपक्षसत्त्वाविपर्ययेन तद्व्यावृत्तिविपर्ययात् केवलव्यतिरेकि अपि तस्य ५१

सपक्षविपक्षयोः। तत्तत्त्वविमर्शयत इति केवलव्यतिरेकि क। यथा पृथिवीमात्रस्य पक्षत्वादित्यत्र कानाम पक्षता।
तां निर्वक्ति संदिग्धसाध्यवान्पक्षः यथा धूमवत्त्वे हेतौ पर्वतः अथ यत्र घनगर्जितेन मेघानुमितिस्तत्राव्या
प्तिर्वह्निप्रत्यक्षकालीनवह्न्यनुमितिर्न जायतामित्यनुमित्साजन्यानुमितिस्थले च तत्र संदिग्धसाध्यस्या
भावादिति चेन्न एतन्मते तत्रानुमितेरस्वीकारात् तदुक्तं नानुपलब्धे न निर्णीतेऽर्थे न्यायः प्रवर्त्तते अपि
तु संदिग्धार्थ एवेति अथवा सिषाधयिषाविरहविशिष्टसिद्ध्यभावः पक्षता साधयितुमिच्छा सिसाधयिषा-
तस्या विरहोऽभावस्तद्विशिष्टा या सिद्धिः साध्यनिश्चयस्तदभाव एव पक्षतेति तदर्थः अस्ति च वह्न्यनुमिति
प्राक्क्षणे पर्वते तदानीं सिषाधयिषायाः सि[illegible]द्ध्यभावात् अभावमात्रेण पक्षता पर्वते वह्निमनुमिनु-

सा सि

मितिं साधयिषाशून्यकाले सिद्धिसत्त्वेऽप्य[नु]मिमीते तदानीं यत्किंचिदभावस्य सत्त्वात् अस्तु च सिद्ध्यभाव एव
सेति चेत् पर्वते वह्न्यनुमितिर्न भूयादिति तादृशकाले सिद्धिसत्त्वेऽप्यनुमितिर्जायते सा न स्यात् तदानीं सिद्ध्य
भावाभावात् अतः सिषाधयिषाविरहविशिष्टत्वं सिद्धेर्वाच्यकम् तथा चानुमितौ सिषाधयिषोत्तेजि
कात् तद्विरहविरहविशिष्टसिद्धिरेव प्रतिबन्धिका तदभाव एव कारणमिति फलितमिति दिक् इति पक्षताप्रसं
गात् सपक्षविपक्षौ क्रमेण निरूपयति निश्चितसाध्यवान् सपक्षः यथा तत्रैव महानसः धूमवत्त्वे हेतावेव सपक्षः
निश्चितसाध्याभाववान् विपक्षः यथा तत्रैव महाह्रदः इति सपक्षविपक्षौ निरूप्य प्रसंगाद्धेत्वाभासान्नि
रूपयति सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पंच हेत्वाभासाः उपाधिरूपदूषणमध्ये कतिपयदूषण

त० टी.

वाऽहेतुवदाभासन्त इति हेत्वाभासाः तत्त्वं चानुमितितत्करणान्यतरप्रतिबंधकयथार्थज्ञानविषयत्वं बाधस्य
त्वं वह्निरनुष्ण इत्यनुमितिप्रतिबंधकं यद्ज्ञानमुष्णत्ववद्व्याननुष्णत्वसाधकं द्रव्यत्वमित्याकारकं तद्विष
यत्वस्य द्रव्यत्वरूपहेत्वाभासे सत्त्वं लक्षणसमन्वयः इत्थमसाधारणविरुद्धसत्प्रतिपक्षज्ञानस्यापि साध्याद
नुमितिप्रतिबंधकत्वं बोध्यं बाधः साध्याभाववत्पक्ष इत्यादिः ह्रदो वा वह्निमान्प्रमेयत्वादित्यादौ व्यभिचारज्ञा
पर्वतो वह्निमानित्याद्यनुमितिकरणं वह्निव्याप्यप्रमेयत्वादेरित्यादिज्ञानं तत्प्रतिबंधकं चैव ह्रदाभावव
द्वृत्ति प्रमेयत्वमित्यादिज्ञानं तद्विषयत्वस्य प्रमेयत्वादौ सत्त्वाल्लक्षणसमन्वयः इत्थमनुपसंहारिभ्रमस्थि
ज्ञानानामनुमितिकरणप्रतिबंधकत्वं बोध्यं बाधभ्रममादाय सद्धेतुवारणाय यथार्थेतीति दिक् कृ
तिहेत्वाभासलक्षणं बालान्बोधयितुं प्राचीनसंकेतमपि दर्शयति सव्यभिचारोऽनैकांतिकः उच्य
ते इति शेषः तत्त्वं च साधारणाद्यन्यतमत्वं विभजते स त्रिविधः साधारणासाधारणानुपसंहारिभेदात् सा
धारणं लक्षयति तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकांतिकः साधारणादित्रयेष्वथ स्पष्टः उदाहरति
यथा पर्वतो वह्निमान् प्रमेयत्वादिति ननु प्रमेयत्वस्य कथं साध्याभाववद्वृत्तित्वमत स्तदुपपादयति प्रमेयत्व
स्य हि साध्याभाववति ह्रदे विद्यमानत्वादाह सर्वाविसंवादेति प्रसक्तेरिति तन्न सपक्षवृत्तित्वस्यापि नि
वेशात् तथैवमपि स्वरूपासिद्धेर्दूषणं जागर्तीति माऽवद्गर्व पक्षवृत्तित्वस्यापि तथात्वात् असाधारणं
लक्षयति सपक्षविपक्षव्यावृत्तोऽसाधारणः सर्वेषु सपक्षविपक्षेभ्यो व्यावर्तते निवर्तत इति

व्यावृत्तः उदाहरति यथा शब्दो नित्यः शब्दत्वात् उपपादयति शब्दत्वं हि नित्यानित्येभ्यो व्यावृत्तं शब्दमात्रवृत्ति नि
त्येभ्य आकाशादिभ्यः अनित्येभ्यो घटपटादिभ्यः आकाशादिः सपक्षो घटपटादिर्विपक्ष इति बोध्यम् अनुपसंहा
रिणं लक्षयति अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारि यथा सर्वमनित्यं प्रमेयत्वात् अत्र सर्वस्य पक्षत्वा
द्दृष्टान्तो नास्ति अत्रोपदर्शितानुमाने इति सव्यभिचारानि ॰ विरुद्धं लक्षयति साध्याभावव्याप्तो हेतुर्विरुद्धः
यथा शब्दो नित्यः कृतकत्वात् कार्यत्वादित्यर्थः कृतकत्वं हि सत्त्वाभावेनानित्यत्वेन व्याप्तम् अनित्यत्वेन
व्याप्तं यत्कृतकं तत्तदनित्यमिति व्याप्तिर्भवत्येवेति भावः इति विरुद्धं निरूपणं सत्प्रतिपक्षं लक्षयति सा
ध्याभावसाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः यस्य हेतोः साध्याभावसाधकं साध्याभावानुमापकं हेत्वन्तरं
प्रतिपक्षो हेतुर्विद्यते यस्य स हेतुः सत्प्रतिपक्षः अयमेव प्रकरणसम इत्युच्यते उदाहरति यथा शब्दो नि
त्यः श्रावणत्वात् शब्दत्ववत् शब्दोऽनित्यः कार्यत्वात् घटवदिति इति सत्प्रतिपक्षनि० असिद्धं विभजते
असिद्धस्त्रिविधः असिद्धत्वमाश्रयासिद्धाद्यन्यतमत्वम् त्रैविध्यं दर्शयति आश्रयासिद्धः स्वरूपासिद्धो व्या
प्यत्वासिद्धश्चेति आश्रयासिद्धत्वं च पक्षतावच्छेदकाभाववत्त्वं भवति हि अरविंदत्वं गगनीयत्वरूपपक्षताव
च्छेदकाभाववत् अरविंदरूपपक्षो गगनीयत्वस्य विरहात् उदाहरति यथा गगनारविंदं सुरभि अरविंदत्वा
त्सरोजारविंदवत् ननु कथमरविंदे गगनीयत्वविरह अत आह अत्र गगनारविंदमाश्रयः स च नास्त्येव अत्रो
पदर्शितानुमाने इत्यर्थः स्वरूपासिद्धमुदाहरति स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात् पक्षेवृत्तित्वे

स्वरूपासिद्धत्वं इदमेव [illegible]त्वं [illegible] मनसि निधायोपपादयति अत्र चाक्षुषत्वं शब्दे नास्ति अत्रोक्तानुमाने इत्यर्थः त
था च चाक्षुषत्वं शब्दे नास्तीत्यनेन चाक्षुषत्वे पक्षावृत्तित्वम् पर्यवसितमिति भावः अथ शब्दे कुतो न चाक्षुषत्व
मत आह शब्दस्य श्रावणत्वात् सोऽयं स्वरूपासिद्धः शुद्धासिद्धभागासिद्धविशेषणासिद्धविशेष्यासिद्धभेदेन ब
हुविधः तत्रैव स्वरूपं दर्शितमेव द्वितीयो यथा रूपादि चतुष्टयं गुणो रूपवत्त्वात् अत्र रूपवत्त्वहेतोः पक्षैकदेशावृत्ति
त्वेन [illegible] भागे स्वरूपासिद्धत्वं तृतीयो यथा वायुः प्रत्यक्षो रूपवत्त्वे सति स्पर्शवत्त्वात् अत्र रूपव
त्त्वविशेषणस्य वायाववृत्तित्वेन तद्विशिष्टस्पर्शवत्त्वस्यापि तत्त्वेन तस्य स्वरूपासिद्धत्वं विशेषणाभावे वि
शिष्टस्याप्यभावात् तुरीयो यथा अत्रैव विशेषणविशेष्यवैपरीत्येन तस्य स्वरूपासिद्धत्वं तु विशेष्याभाव
प्रयुक्तविशिष्टाभावादिति बोध्यम् व्याप्यत्वासिद्धं निरूपयति सोपाधिको व्याप्यत्वासिद्धः ननु कोऽयमुपा
धिरत आह साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वं ननु किं साध्यव्यापकत्वं साधना
व्यापकत्वं च अत लक्षणमेव दर्शयति साध्यसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं साध्यव्याप
कत्वं साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वं यथा पर्वतो धूमवान् वह्नेः अत्रार्द्रे
धनं उपाधिः लक्षणं लक्ष्ये योजयति यत्र धूमस्तत्रार्द्रेधनसंयोग इति साध्यव्यापकत्वं यत्र वह्निस्तत्रार्द्रे
धनसंयोगो नास्ति अयोगोलके आर्द्रेधनसंयोगाभावात् उपाधिभेदमादायासंभववारणाय व्याप
कत्वशरीरेऽत्यन्तपदमावश्यकं उपाधिमुपसंहरति एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वादार्द्रे
साधनमेद[illegible]साधनस्यो[illegible]

धनसंयोग उपाधिः सोपाधिकतया द्वित्हिमत्वे व्याप्यत्वासिद्धं सोयं उपाधिस्त्रिविधः केवलसाध्यव्यापकः
पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्नसाध्यव्यापकश्चेति तत्राद्यस्तूपदर्शित एव एवं क्र
त्वंतर्वर्त्तिनी हिंसा धर्मसाधनं हिंसात्वात् क्रतुबाह्यहिंसावदित्यत्र निषिद्धत्वमुपाधिः तत्र यत्र
धर्मसाधनत्वं तत्र निषिद्धत्वमिति साध्यव्यापकता यत्र हिंसात्वं तत्र न निषिद्धत्वमिति साधना
व्यापकता च क्रतुहिंसायां निषिद्धत्वस्याभावात् मा हिंस्यात् सर्वा भूतानीति सामान्यवाक्यतः प
शुना यजेतेत्यादिविशेषवाक्यस्य बलीयस्त्वात् अतएव हिंसात्वं नाधर्मसाधनत्वप्रयोजकमपि तु नि
षिद्धत्वमेवेत्यादिकमपि द्रष्टव्यं द्वितीयो यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यत्रोद्भूत
रूपवत्त्वमुपाधिः तस्य च प्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वमिति न केवलसाध्यव्यापकत्वं रूपे व्य
भिचारात् किंतु द्रव्यत्वलक्षणो यः पक्षधर्मस्तदवच्छिन्नवह्निः प्रत्यक्षत्वं यत्र तत्रोद्भूतरूपव
त्त्वमिति साधनाव्यापकत्वं च वायावुद्भूतरूपवत्त्वस्य विरहात् तृतीयो यथा प्रागभावो विनाशी
जन्यत्वादित्यत्र भावत्वमुपाधिस्तत्र यत्र विनाशित्वं तत्र भावत्वमिति न केवलसाध्यव्यापकत्व
मेवास्ति यत्र जन्यत्वं तत्र न भावत्वमिति साधन प्रागभावे भावत्वविरहात् किंतु जन्यत्वरूपसाध
नावच्छिन्नसाध्यव्यापकत्वमेवास्ति यत्र जन्यत्वं तत्र भावत्वमिति साधनाव्यापकत्वं च ध्वंसे भावत्व
विरहात् एवं स्यामो मित्रातनयत्वादित्यत्र शाकपाकजत्वमुपाधिः श्यामत्वस्य नीलघटादिषु सत्त्वान्न केवल

प्रो०टी
८०

साध्यव्यापकत्वं किंतु साधनावच्छिन्नसाध्यव्यापकत्वमेव अष्टमपुत्रे शाकपाकजत्वं निरस्तेत्सा
धनावच्छिन्नसाध्यव्यापकत्वे व्यापकत्वं चेत्यादिकमपि द्रष्टव्यम् अथ वह्निमान् धूमादित्यत्र म
हानसत्वाभावोप्युपाधिः स्यात् तस्य महानसान्यत्वलक्षणपक्षधर्मावच्छिन्नसाध्यव्यापकत्वा
दिति चेन्न पक्षधर्मः इत्यत्र पक्षदृष्टांतोभयसाधारणधर्मस्यैव विवक्षितत्वात् अथ तर्हि ग
तमुपाधिः लक्षणमिदमिति चेन्न निरवच्छिन्नसाध्यपक्षदृष्टांतोभयसाधारणधर्मसाधना
न्यतरावच्छिन्नसाध्यान्यतरव्यापकत्वे सति साधनाव्यापक उपाधिरिति तस्य परिष्करणी
यत्वात् इदं च लक्षणमाचार्याणामेवाभिमतं लक्षणांतरं तु ग्रंथांतरे द्रष्टव्यं इत्युपाधिः नन्वे
वंतावतोपाधिरव्यगतः किं तर्हि व्याप्यत्वासिद्धमत आह वह्निमत्वं व्याप्यत्वासिद्धम् तस्य व्याप्यत्वासिद्धहेतुमात्रसोपा
धिकत्वात् इत्यनुपदर्शितहेत्वंतरोपि द्रष्टव्याः इत्युक्तिद्धानि० बाधितं लक्षयति यस्य साध्याभावः प्रमाणेन निश्चि
तः स बाधितः यथा वह्निरनुष्णो द्रव्यत्वात् अत्रानुष्णत्वसाध्याभाव उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यते इति प्रत्य
भिज्ञाति बाधितत्वम् स्पर्शनेन त्वगिन्द्रियेण एवं घटः क्षणिकः सत्वादित्यादिरपि बाधितः तत्र सोयं घटः
इति प्रत्यभिज्ञाख्यप्रत्यक्षेण क्षणिकत्वलक्षणसाध्याभावस्य परिच्छिन्नत्वात् इति बाधितनिरूपणं उक्तल
क्षणमपि हेत्वाभासस्यैव यथा अतिप्रसक्तं लक्षणं व्याप्यत्वासिद्धे तत्र भवति अत्रासाधारणधर्मोपाधिः अव्याप्त
लक्षणं तु भागासिद्धे तत्र भवति असंभवग्रस्तलक्षणं तु स्वरूपासिद्धे तत्र भवति सिद्धसाधने त्वाश्रयासिद्धे तत्र भव

८४

ति संदिग्धसाध्यवत्त्वेऽवाप्रयत्वात् न चानुक्तिहेतुसाधनं निग्रहस्थानेन भवतीति वदंति इति तर्कसंग्रहव्या
नेऽनुमानपरिच्छेदः अवसरसंगतिमभिप्रेत्यानुमानानंतरमुपमानं निरूपयति उपमितिकरणमुपमानं उपमितेः क
रणमुपमानमित्यर्थः तत्र सादृश्यज्ञानमिति निवेदयिष्यन् ननूपमितिरेव के त्यत आह संज्ञासंज्ञिसंबंधज्ञानमु
पमितिः संज्ञा च पदं संज्ञी चार्थस्तयोः संबंधो वाच्यत्वं तत्प्रकारकं गवयो गवयपदवाच्य इति ज्ञानमुपमितिरि
त्यर्थः उपमितित्वं चोपमिनोमीत्यनुभवसिद्धो जातिविशेषः ननूपमितिकरणमुपमानमित्युक्तं किं तदत आह
तत्करणं सादृश्यज्ञानं सादृश्यप्रकारकज्ञानमित्यर्थः प्रतिपादयति तथा हि कश्चिद्गवयशब्दार्थमजा
त नन् कुतश्चित् आरण्यपुरुषात् गोसदृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पश्यतीति तदनंतरं गवयप
दवाच्य इत्युपमितिरुत्पद्यते वाक्यार्थं स्मरन् गोसदृशं पश्यतीति गोसादृश्यं पश्यन्नतिदेशवाक्यार्थं स्मर
तीत्यर्थः अयं गवयपदवाच्य इति अभिप्रेत गवयो गवयपदवाच्य इत्यर्थः तेन गवयांतरे शक्तिग्रहो न भवे
त्प्रसंग इति परास्तं तथा च गोसादृश्यविशिष्टपिंडज्ञानं करणमतिदेशवाक्यार्थस्मरणं व्यापार उपमितिः
फलमिति सारम् तच्चोपमानं त्रिविधं सादृश्यविशिष्टपिंडज्ञानमसाधारणधर्मविशिष्टपिंडज्ञानं वैधर्म्य ३
विशिष्टपिंडज्ञानं च द्वितीयो यथा खड्गमृगं कीदृगिति पृष्टे नासिकालसदेकशृंगोऽतिक्रान्तगजाकृति
श्चेति तज्ज्ञात्रभ्यः श्रुत्वा कालांतरे तादृशपिंडं पश्यन्नतिदेशवाक्यार्थं स्मरति तदनंतरं खड्गः खड्गपद
वाच्य इत्युपमितिरुत्पद्यते अत्र नासिकालसदेकशृंगः इत्यसाधारणधर्मः तृतीयो यथा उष्ट्रः कीदृगिति

स्येगासादिवत्समानरूपकृत्सगोवशरीर इत्साश्चादिते कालांतरे तत्पिंडदर्शनात् वैधर्म्यविशिष्टपिंडज्ञाने
सतीतिदेशवाक्यार्थस्मरणा नंतरं उष्ट्र उष्ट्रपदवाच्य इत्युपमितिरुत्पद्यते इत्याहुः नन्वाप्तवाक्यजन्यत्वा
च्छाब्दबोधएवास्तीति चेन्न उपमिनोमीत्यनुव्यवसायस्यापलापप्रसंगादिति सर्वं रमणीयम् इतित
र्कसंग्रहव्याख्याने उपमानपरिच्छेदः अवसरसंगतिमभिप्रेत्योपमानानंतरं शब्दं निरूपयति आ
प्तवाक्यं शब्दः शब्दप्रमाणमित्यर्थः भ्रांतविप्रलंभकयोर्वाक्यस्य शब्दप्रमाणत्ववारणायाप्तेति न
नु कोयमाप्त इत्यत आह आप्तस्तु यथार्थवक्ता यथाभूतार्थाभिधाता अर्थोपदेष्टा ननु वाक्यं किमत आ
ह वाक्यं पदसमूहः यथा गामानय शुक्लां दंडेन पदं लक्षयति शक्तं पदं निरूपकतासंबंधेन श
क्तिविशिष्टमित्यर्थः इति पदसामान्यनि० ननु शक्तिरेव केत्यत आह अस्मात्पदादयमर्थो बो
द्धव्य इतीश्वरेच्छा शक्तिः घटपदात् घटपदार्थो बोद्धव्य इतीश्वरेच्छैव शक्तिरित्यर्थः अर्थस्म
त्यनुकूलपदपदार्थः संबंधत्वं शक्तित्वं सा च पदार्थांतरमेवेति मीमांसकास्तन्न मानाभावा
त् आधुनिके नाम्नि शक्तादशेऽह्नि पिता नाम कुर्यादितीश्वरेच्छास्त्येव नव्यास्तु आधुनिके संके
तितडित्यादिपदेईश्वरेच्छाया अभावादिच्छैव शक्तिरिति भणन्ति शक्तिग्रहश्च वृद्धव्यवहारा
त् भवति यथा उत्तमवृद्धेन घटमानयेति वाक्ये प्रयुक्ते मध्यमवृद्धो घटमानयति तदवलोक्य व्यु
त्पित्सुर्बालोऽन्वयव्यतिरेकाभ्यां घटमानयेति वाक्यजन्यत्वं मध्यमप्रवृत्तिजनकज्ञाने निश्चिनोति त

तो गामानय घटं नयेति वाक्यान्तरं प्रत्येवतावापोद्वापाभ्यां घटपदस्य घटत्वविशिष्टे शक्तिर्गोपदस्य गोत्ववि-
शिष्टे शक्तिरिति लोगग्रहाति एवमस्तीति बोधके धातुप्रत्ययादीनां शक्तिग्रहो व्याकरणाद्भवति क्वचिदुपमा-
नादपि तदुक्तं शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्य-
तः सिद्धपदस्य वृद्धाः इति यवमयश्चरुर्भवतीत्यत्र यवपदस्य दीर्घशूक[illegible] विशेषे वंशतेः सर्वत्र स्यानोजाय-
ते यत्रैतेन मोद[illegible]नाश्च तिष्ठन्तीति यवाः कारीशशालिनः इति वाक्यशेषाद्दीर्घशूके शक्तिरवधार्यते ह[illegible] स्तीघ्रतीती-
लस्य गजो यूतीतीति विवरणात्कलिपदस्य गजे शक्तिग्रहः विवरणं च समानार्थबोधकपदान्तरेण तदर्थ-
कथनमिदमेव विवृत्तिरित्युच्यते इह विकचसरोरुहे भ्रमरः इत्यादौ प्रसिद्धपदसान्निध्याद्भ्रमरे शक्ति-
ग्रहः शक्यं तु गम्यमेव न व्यक्त्यनुगमाद्गवादिपदानां व्यक्तावेव शक्तिर्न तु जातावपि गौरवादिति मेनिरे मीमांसका
स्तु विशेषणत्वेन गोत्वादेरेव प्रथममुपस्थितत्वाद्गवादिपदानां गोत्वादावेव शक्तिः व्यक्तिलाभस्तु गोत्व-
स्याश्रयं विनानुपपन्नमित्याक्षेपादित्याहुः तदसत् विनाप्याक्षेपं गौरस्तीत्यनेन व्यक्तिप्रतीतेः प्राभाकरास्तु
ग[illegible]वादिशब्दानामानयनादिरूपकार्यान्विते गवादौ शक्तिः सर्वत्र कार्यवाक्यादेव व्युत्पत्तेः भूतले घट इत्या-
दिसिद्धवाक्यात्तु न व्युत्पत्तिरित्याहुः तदसत् इह कोपपुष्यामिति सिद्धवाक्येपि पामराणां व्युत्पत्तिदर्शनात्
चैत्रः पचतीत्यादावाख्यातस्य कर्तरि शक्तिरिति वैयाकरणास्तन्न गौरवात् किन्तु कृतावेव तथा तत्र गवादि
शक्तिग्रहे गृहीतशक्तिकगवादिशब्दस्य ज्ञानं वा करणं पदजन्यपदार्थस्मरणं व्यापारः आकाङ्क्षायोग्य-
तासन्निधितात्पर्यज्ञानानि सहकारीणि शाब्दबोधः फलमिति सारः इति शब्दशक्तिनि० पदं च तु विधं यौगि

व्यक्तावेव

कं रूढं योगरूढं यौगिकरूढं च अवयवशक्तिर्योगः अवयवमात्रशक्तिकं यौगिकं यथा पाचकादिपदं समुदा
यशक्तिः रूढिः समुदायशक्तिकं रूढं यथा गोपदं अवयवसमुदायोभयशक्तिकमनेकजातीयार्थप्रतिपादकं
योगरूढं यथा पंकजादिपदं अवयवशक्त्या पंकजनिकर्तृत्वेन रूपेण बोधयति समुदायशक्त्या च कमलत्वेन रूपेण
अतएव समुदायशक्तिरावश्यकी यौगिकार्थरूढ्यर्थयोः स्वातंत्र्येण बोधकं यौगिकरूढं यथोद्भिजा
दिकं शक्तिरिव पदस्य लक्षणापि वृत्तिः इति पदनि० अथ केयं लक्षणा शक्यसंबंधो लक्षणा वृत्ते
च गंगायां घोष इत्यत्र गंगापदशक्यप्रवाहसंबंधस्तीरे लक्षणाबीजं तु तात्पर्यानुपपत्तिः अतएव प्रवा
हे घोष इति तात्पर्यानुपपत्तेस्तीरे लक्षणा तात्पर्यं तु वक्तुरिच्छा वक्ताभिप्रायाभिसंधापर्यायिता तेन न मौनिवाक्ये
व्याप्तिः सा च लक्षणा त्रिधा जहल्लक्षणा अजहल्लक्षणा जहदजहल्लक्षणा चेति यत्र वाच्यार्थस्यान
न्वयः तत्राद्या यथा गंगायां घोष मंचाः क्रोशंतीत्यादौ यत्र वाच्यस्याप्यन्वयस्तत्र द्वितीया यथा छत्रिणो यांतीत्या
दौ अत्र छत्रिणामन्यदितरेषां च गमनान्वयः यत्र वाच्यैकदेशबाधेनैकदेशान्वयस्तत्र तृतीया यथा सोयं देवद
त्त इत्यादौ अत्र तद्देशकालविशिष्टस्य बाधः तत्पुरुषे राजपुरुष इत्यत्र राजपदस्य राजसंबंधिनि लक्षणा ब
गो हुव्रीहावपि लक्षणा यथा चित्रगुरित्यत्र पदस्य गोस्वामिनि लक्षणा चित्रपदं तात्पर्यग्राहकं द्वंद्वे धवख
दिरौ छिंधीत्यत्र धवखदिरपदयोः स्वदर्थप्रकारतया भासमानद्विवचनार्थद्वित्वे लक्षणा कर्मधारये
तु नीलोत्पलमित्यादौ न लक्षणा निषादस्थपतिं याजयेदित्यत्रापि कर्मधारये न लक्षणा वेदबोधितयाज
प नानुपपत्त्या याजनपदन्तं वेदे स्वाधिकारकल्पनं तु स्त्रीशूद्रौ नाधीयातामिति वेदस्य निषादातिरिक्तशूद्रपरत्वा
नं नी

अवयवशक्त्या ... दिकं ... दायशक्त्या ... (right margin note, partly illegible)

शाब्दसामग्रीत्वघटिता प्रमाणविभाजकवाक्ये शाब्दस्याप्युपदिष्टत्वेन तत्कृतो न प्रदर्शितमतः शाब्द साकांक्षार्थज्ञानं शाब्दज्ञा
नं शाब्दत्वं च शाब्दात्मेवमीत्यनुभवसिद्धा जातिः शाब्दबोधक्रमो यथा चैत्रो ग्रामं गच्छतीत्यत्र ग्रामकर्मकगमना
नुकूलवर्तमानकृतिमानिति शाब्दबोधः द्वितीयायाः कर्मत्वमर्थः धातोर्गमनमनुकूलत्वं च तत्तगमर्थ्यादयाभा
ख्याते लटो वर्तमानत्वमाख्यातस्य कृतिस्तत्त्ववेधः तत्तगमर्थ्यादयाभासते रथो गच्छतीत्यत्र गमनानुकूलवर्तमा
नकृति[illegible]मनिति शाब्दबोधः क्त्वाप्रत्ययस्य कर्तृपूर्वकालीनत्वं चार्थः भोक्तुं गच्छतीत्यत्र भोजनप्रागभावकालीन अन
भोजनविषयकेच्छावान् गच्छतीति शाब्दबोधः चैत्रेण पच्यन्ते तंडुला इत्यत्र चैत्रवृत्तिकृतिजन्यपाकजन्य
ति फलशाली तंडुल इति शाब्दबोधः वृत्तित्वं सं[illegible] सर्गवत्त्वमर्थः जन्यत्वं च धातोः पाक[illegible] जन्यत्वं तत्सर्गः
फलकर्मात्मनेपदार्थः शालित्वं संसर्गः क्वचिदात्मनेपदार्थो नाभासते यथा चैत्रेण सुप्यते इत्यत्र चैत्र
वृत्तिकृतिजन्यः स्वापः इति बोधः चैत्रः पचतीत्यत्र [illegible] वर्तमानप्रागभावप्रतियोगिपुत्पत्तिकपाकजनक
कृतिमान् चैत्र इति बोधः गामानयेत्यत्र गोकर्मकमदिच्छाविषयानयनानुकूलकृतिमांस्त्वमिति बोधः
ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र कृतिसाध्यत्वबलवदनिष्टाजनकेष्टसाधनं ज्योतिष्टोमनामयागः स्व
र्गकामं कृत्यार्थः एवमेव सर्वत्र प्रथमान्तमुख्यविशेष्यकः शाब्दबोधो न्यायमते वैयाकरणास्तु धात्वर्थमुख्य
विशेष्यक एव शाब्दबोधः यथा चैत्रः पचति तंडुलमित्यत्र तंडुलनिष्ठविक्लित्त्यनुकूलव्यापारश्चैत्रकर्तृक इति बो पाक
धस्तथाहुः सर्वत्र दृष्टान्तमेवेत्यवाक्यं यायुक्तः स्येवकार[illegible] स्यात्यतायोगव्यवच्छेदार्थः इति संक्षेपः इदमपि बोध्यं
लटो वर्तमानत्वं लिटो भूतानद्यतनपरोक्षत्वं लुटो भविष्यत्वानद्यतनत्वं लृटो भविष्यत्वं लेटो वक्ष्यमाणवि
कल्पादिवदातेत्यत्र विशेषप्रयुक्तो विकारः [illegible]

त्यस्थले चाहमिदानीं मत्कृतिसाध्यसंध्यावंदनकोऽवाप्तसांप्रतं विहितसंध्याकालीनप्रौढ्यादिमत्वात्
इति शौचादिमत्त्वप्रतिसंधानजन्यकृतिसाध्यताज्ञानमिति समाधानं तथाननुगम इति चेत् स्वविशेष
णवत्ताप्रतिसंधानजन्यत्वमेव कृतिसाध्यताज्ञानेऽनुगतं संपुरस्य: तच्च काम्येष्वेव विशेषणं नित्यस्थ
स्थले तु शौचादिकमेवेति प्रसज्यति तन्न मूलघीयस्त्वात् इति विधिसामान्यनिरूपणं तद्विधाऽपूर्ववि
धिनियमविधिपरिसंख्याविधिभेदात् तत्रात्यंताप्राप्तो विधिराद्यः यथा स्वर्गकामो यजेतेत्यादौ अत्र य
जनस्याप्राप्तत्वात् पक्षेऽप्राप्तयोः प्राप्तावेको नियम्यते तद्द्वितीयं यथा व्रीहीनवहंतीति अत्र व्रीहिषु न
खावहननमुशलावहननयोः प्राप्तौ मुशलावहननमेव नियम्यते तत्र प्राप्तस्यैकस्य चिद्व्यावृत्तिस्तृतीयः य
था पंच पंचनखा भक्ष्या इत्यत्र सर्वेषां पंचनखानां भक्षणे प्राप्ते पंचैव पंचनखा भक्ष्या इति साधीयते
शशकः शल्लकी गोधा खड्गी कूर्मश्च पंचम इति पंचनखा रेया इति विधिविशेषणनिरूपणं अर्थ
वादस्त्रिधा गुणवादोऽनुवादो भूतार्थवादश्चेति तत्राद्यो यथा आदित्यो यूपः यजमानः प्रस्तर इति
प्रमाणांतरेण निर्णीतार्थस्य ज्ञापकोऽनुवादः यथाग्निर्हिमस्य भेषजमित्यत्र कालेऽपि तद्गुणज्ञापको
ता भूतार्थवादः यथा जरायामत्यर्हं प्रस्तर इति इत्यर्थवादः मंत्रस्त्वाह्वः उन्नीत्यादि इति मंत्राणि ननु शब्दो न प्र
माणांतरं संसर्गज्ञानत्वनुमानादेव गृह्यते तथाहि गामानयेत्यादिपदानि स्मारितार्थसंसर्गवंति ज्ञा
कांक्षादिमत्पदकदंबत्वात् मद्वाक्यवदिति चेन्न अनुमितिविलक्षणशाब्दात्प्रत्येमीत्यनुभव साक्षी

कंशब्दास्यापलायितुमशक्यत्वात् अर्थापत्तिरपि न प्रमाणांतरं अस्ति. तथाहि पीनो देवदत्तो दिवा न भुंक्ते इति दृष्टे श्रुते वा दि-
वा भुंजानस्य पीनत्वं रात्रिभोजनं विनानुपपत्तिज्ञानं भवति इयमेवार्थापत्तिः पीनो देवदत्तो रात्रौ भुंक्ते इत्यनुभवो-
जायते इतिमेवं मन्यस्व अयं देवदत्तो रात्रिभोजी दिवा भुञ्जानत्वे सति पीनत्वादिति केवलव्यतिरेक्यनुमानेनैव त-
त्सिद्धेः तस्मात्र किंचित्करत्वात् अनुपलब्धेः प्रमाणत्वं निराकृतमेव प्राक् संभवोऽपि न प्रमाणांतरं तथा-
त्म हि सद्विधा संभावनाको निर्णयात्मकश्चेति तत्रादिमो न प्रमाणं यथा ब्राह्मणेषु चतुर्दशविद्याभिज्ञत्वं संभवे-
तीति चतुर्दशविद्याश्च ऋग्वेदश्च यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं ज्योतिषं छंदो नि-
रुक्तयः मीमांसा तर्कशास्त्रं च पुराणं धर्मशास्त्रकं विद्याश्चतुर्दशैताश्च पुरुषार्थनिदानका इति वेदांतस्य
मीमांसायां अंतर्भावः वैशेषिकस्य तर्के सांख्यपातंजलपाशुपतवैष्णवागमानां पंचरात्रभागवतादिभेदभवि-
ष्यब्रह्मवैवर्तलिंगवाराहकौर्ममात्स्यगारुडब्रह्माण्डभेदादष्टादशधा वाशिष्टलैंगनारसिंह नंदीपनार-
दीय वामनीय हंसतत्त्वसारदेवीसशैव धार्मिककापिलमानववारुणरेणुकवायवीयकालीयमाहेश्वर-
पाराशरमारीचभार्गवादिभेदादुपपुराणानि बहुविधानि मनुयाज्ञवल्क्यविष्णुयमाङ्गिरसवाशिष्ठदक्षसं-
वर्तशातातपपराशरगौतमशंखलिखितहारीतापस्तंबोशनसकात्यायनव्यासायनबृहस्पतिदेवलनारद रं
स्त्रा पैठीनसिप्रभृतिकृतानि बहूनि धर्मशास्त्राणि तस्माच्चतुर्दशैव विद्याः ननु तत्रायुर्वेदधनुर्वेदगांधर्ववेदार्थशा-
स्त्रभेदादुपवेदचतुष्टयम् वात्स्यायनकामशास्त्रस्यायुर्वेदांतर्भावः नीतिशास्त्रशिल्पिशास्त्राश्वशास्त्रसूपकारशा-

रामायणमो
तादीनापुम
त्रैवासिक
मार्कंडयरो

नं० ४१

ति

स्य चेत्तु: वह्निकलापात्साध्याभावसाधकाभावः तस्मादृष्टादृष्टोभयविधाऽस्ति चेत्स्यादेव इति पर्यालोचनादिति निर्ण
याकसंभवोनुमानेतंभ्रतः इह वृद्धेय वृद्धिस्थितौसीतिव्याप्यपि न प्रमाणांतरं किंत्वज्ञातमूलवत्त्वकः शब्दः चेष्टापि
न प्रमाणांतरं किंत्वनुमानप्रयोजिकैव तस्माच्चत्वार्येव प्रमाणानीति सिद्धं एतेनोपलब्ध्यादिप्रमाणान्यप्य
सिद्धानीति बोध्यं इति शब्दखंडः ज्ञाननिष्ठं तद्वति तत्प्रकारत्वकं प्रमात्वं स्वतो ग्राह्यं परतो वा इति विप्रतिप
त्तिः अत्र ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यमिदमेव स्वतोग्राह्यमिति किं
वदंती अस्यार्थः ज्ञानप्रामाण्यं ज्ञाननिष्ठाप्रामाण्याग्राहिका यावती ज्ञानग्राहिकानुव्यवसायादिरू
पासामग्रीतद्ग्राह्यमिति इदमेव स्वतस्त्वमित्युच्यते यत्र गुंजापुंजेयं वह्निरिति भ्रमः पश्चादिदं ज्ञा
नमप्रमेति प्रमा ततो द्वितीयज्ञानं प्रमेति प्रमा तत्र तृतीयज्ञानग्राह्यत्वस्याऽनुव्यवसायगतप्रामाण्ये सत्त्वे
पि तृतीयज्ञानस्य व्यवसायनिष्ठाप्रामाण्यग्राहकत्वेन प्रामाण्याग्राहकत्वाभावात्स्वतस्त्वं न संजाघटी
ति अतस्तद्दितिप्रामाण्याधारएव तत्पदार्थः यत्रायं घट इति प्रमानंतरं मिदं ज्ञानमप्रमेत्यप्रमा तत्र
धूलीपटलेऽयं धूम इति ज्ञान प्रकारत्वस्य धूलीपटलत्वे सत्त्वेऽपि स्वतो ग्राह्यत्वस्य प्रामाण्येऽस्त
त्वाद्बाधः अतोऽप्रामाण्याग्राहकेति सिद्धसाधनवारणाय यावदिति नन्वनुव्यवसायो घटं घटत्वेन स
नवायं च विषयीकुर्वन्नात्मनि प्रकारिभूतघटमात्मानं तत्संबंधं भूतव्यवसायं विषयी करोति एवं

सतिपुरोवर्त्तिप्रकारकत्वेनधर्मिविषयप्रमापदार्थत्वेन स्वतएवप्रामाण्यं गृह्णातीति मुरारिमिश्राः अनुव्यवसाया
त्मकेनैव स्वेन ज्ञानं तद्गतप्रकारमिति मातृमानमेयविषयत्वात्त्रिपुटीत्युच्यते स्वप्रकाशज्ञानमर्थाद्देवस्व
ज्ञानमिव वर्त्तिप्रामाण्यं स्वतएव गृह्णातीति प्राभाकराः अथ घटज्ञानानंतरं घटज्ञाततानामफलं भवति इति
ततो ज्ञाततो घटइतिप्रत्ययविषयज्ञातताया ज्ञानमात्रस्यातीन्द्रियत्वात् ज्ञानं तन्निष्ठप्रामाण्यं चाहं घटत्वप्रका
रकज्ञानवान् घटत्वप्रकारकज्ञाततावत्त्वादित्यनुमीयते तस्मात्स्वतएव प्रामाण्यं गृह्यते स्वकीयग्रा
हकं स्वयं ज्ञानग्राहकातिरिक्तानपेक्षत्वमिति भाट्टाः तन्नेति गौतमीयाः एवमयमाशयः इदं जलमि
ति ज्ञानानंतरमनभ्यासदशायां प्रमात्वं ज्ञानं प्रमान वेति संशयो नस्यादिति तत्र स्वप्रामाण्यस्य
निश्चितत्वात् स्वस्वप्रकाशत्वमपि दुर्वचम् चाक्षुषादिना स्वात्मनो विषयीकर्त्तुमशक्यत्वात् ज्ञानवि
षयं तातिरिक्तस्यानतामामानाभावात् अतो निषेधकोटिरेव बलीयसीति कृतं तर्ककर्कशविचारभा
धारेणानुसिंधूनां अथ कथं परतः प्रामाण्यं गृह्यत इति चेत् उच्यते प्रथमं जलज्ञानं निर्विकल्प
कं ततइदं जलमिति विशिष्टज्ञानं ततइच्छा ततः प्रवृत्तिस्तदनंतरं जललाभस्तदनंतरं पूर्वोत्पन्नं ज्ञानं प्र
तद मा समर्थप्रवृत्तिजनकत्वात् यन्नैवं तन्नैवं यथाऽप्रमेति व्यतिरेकिणा यथा घटज्ञानमित्यन्वयदृष्टांत
स्यासंभवेनान्वयव्यतिरेकिणा वा प्रामाण्यं निर्धार्यते इति ज्ञानोपरतस्त्वप्रमायाः गुणजन्यत्वादुत्प

सं०२१०।
५०।

नोपरतत्वं गुणस्य प्रमासाधारणकारणत्वात् यथा प्रत्यक्षे संनिकर्षः अनुमितौ विशेषज्ञानं उपमितौ सादृश्य
ज्ञानं शाब्दे शब्दज्ञानं एवमप्रमायामपि परतो ग्रह्यते इदं च मीमांसकानामप्यनुमतं पुरोवर्त्तिनि प्रका
राभावस्यानुव्यवसायेनानुपस्थितत्वात् अप्रमायाः पित्तमंडूकवसांजनयोक विकल्पहरत्वादिदो
षजन्यत्वादित्युत्तरं नोपरतत्वं दोषस्य अप्रमासाधारणकारणत्वादिसाफल्यं विस्तर इति प्रामाण्यवा
दः अप्रमायामनुभवं विभजते अयथार्थेति संशयं लक्षयति एकस्मिन्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्य
ज्ञानं संशयं इति एकस्मिन् धर्मिणि एकस्मिन्नेव पुरोवर्त्तिपदार्थे विरुद्धो व्याधिकरणो ये नानाध
र्मवैशिष्ट्यावगाहित्वादतिप्रसक्ति वारणायैकस्मिन्निति पटः पृथिवीति ज्ञानस्यैकस्मिन्ध
र्मिणि पटे पटत्व पृथिवीत्वरूपनानाधर्मवैशिष्ट्यावगाहित्वादतिप्रसक्तिरतो विरुद्धेति
ति पटत्वविरुद्धघटत्ववान् घट इति ज्ञाने तिप्रसक्तिवारणाय नानेति उदाहरति यथेति स त्रिविधः सा
धारणधर्मधीजन्योऽसाधारणधर्मधीजन्यो विप्रतिपत्तिजन्यश्चेति विशेषादर्शने कोटिद्वयस्म
रणं संशयमात्रे हेतुः तत्राद्यस्तु उपदर्शित एव उच्चैस्तरत्वं तच्च साधारणधर्मः स्थाणुत्वनिष्ठापक
वक्रकोटरत्वं पुरुषत्वनिष्ठापककरादिमत्वं वा विशेषः स्थाणुत्वपुरुषत्वे च कोटिद्वयं द्वितीयो
यथा शब्दत्वं नित्यानित्यव्यावृत्तं शब्दमात्रवृत्तीति ज्ञाने शब्दो नित्यो न वेति संशयः तृतीयो यथा प्रामा

नानाधर्माः स्था
णुत्वपुरुषत्वा
दयः ...
...
गाहिज्ञानं संशय
...
...
...
टस्य ...
...

५०

स्यस्वतोग्राह्यं परतोग्राह्यं वेति संशयः इति संशयनि० विपर्ययं लक्षयति मिथ्याज्ञानं विपर्ययः इति विपर्ययनि०
तर्कं लक्षयति व्याप्यारोपेण व्यापकारोपस्तर्कः वह्न्यभावो व्याप्यः धूमाभावो व्यापक उदाहरति यदि वह्निर्न
स्यात्तर्हि धूमोपि न स्यात् यद्यपि तर्कस्य विपर्ययात्मकत्वेन पृथगभिधानमनुचितं तथापि प्रमाणा
नुग्राहकत्वात्स उचित इति बोध्यं स्वप्नस्तु पुरीतद्बहिर्देशावर्देशः दोषः संयोग [illegible] नासि स्व
तेः दृष्टविशेषणाच्चिंताविशेषणाद्धातुविशेषेण जन्यते स च मानसविपर्ययेन्तर्भूतः इदं चिंतित्वा किं
ध्यवसायश्च विशेषा[illegible]नेन जन्यते स च विपर्यय एव इति तर्कनि० इत्थं यथार्थानुभवः स्मृतिं विभजते
स्मृतिरपि द्विविधा यथार्थाऽयथार्था च प्रमाजन्या यथार्था स्वजन्यसंस्कारसंबंधेन प्रमायाः स्मृति
कारणत्वमिति भावः अप्रमाजन्याऽयथार्था इदं रजतमित्यप्रमातो रजतत्वेन शुक्तेः स्मरणमय
थार्थं इति स्मृतिनि० इति बुद्धिग्रंथ [illegible] नि० सर्वेषामनुकूलवेदनीयं सुखं सर्वात्मनामनुकूलत्वे
द्यपत्त्यं सुखमित्यर्थः अनुकूलत्वमिष्टत्वं अहं सुखीत्यनुभवसिद्धसुखत्वजातिमद्धर्ममात्रासाधा
रणकारणं धर्मभेदात् विषयसाक्षात्कारजं प्रथमं राज्याधिपत्यप्राप्तिस्वर्गवादिजं द्वितीयं विषयं ध्या
नजं तृतीयं सुखनमस्कारायासादिजलाद्युवरूपं तुरीयं इति सुखनि० दुःखं निरूपयति सर्वेषां प्र
तिकूलवेदनीयं दुःखं प्रतिकूलत्वं च द्विष्टत्वं दुःखत्वजातिमद्धर्ममात्रासाधारणकारणं गुणो वा
दुःखं इदमपि सुखवच्चतुर्विधं इति दुःखनि० इच्छां निरूपयति इच्छा कामः काम इति पर्याय इच्छात्वजातिमती इ

गुणोऽधर्मः सुखं
तच्चतुर्विधं वै
षयिकमभिमानि
कं मनोरथिका
भ्यासिकं च

१७०.८१
५१

छा सा द्विधा फलेच्छोपायेच्छा च फलं सुखादिकमुपायो यागादिः इतीच्छानि० द्वेषं निरूपयति क्रोधो
द्वेषः द्वेष्मीत्यनुभवसिद्धद्वेषत्वजातिमान् द्विष्टसाधनताज्ञानजन्यो गुणो वा द्वेषः इति द्वेषनि० प्रयत्नं निरूप
यति कृतिः प्रयत्नः प्रयत्नत्वजातिमान् प्रयत्नः स त्रिविधः प्रवृत्तिनिवृत्तिजीवनयोनिभेदात् इच्छाजन्यो
गुणः प्रवृत्तिः द्वेषजन्यो गुणो निवृत्तिः जीवनादृष्टजन्यो गुणो जीवनयोनिः स च प्राणसंचरकारणं
इति प्रयत्ननि० धर्मं निरूपयति विहित[illegible]कर्मजन्यो धर्मः वेदविहितेत्यर्थः स चैककर्मनाश्यः जल
स्पर्शकीर्त्तनभोगतत्त्वज्ञानादिना नश्यति इति धर्मनि० अधर्मं निरूपयति निषिद्धकर्मजन्यस्त्वधर्मः वे
दनिषिद्धेत्यर्थः स च भोगप्रायश्चित्त[illegible]ज्ञानादिना नश्यति एतावदृष्टमिति कथ्यते वासनाजन्यो च त[illegible]
त्सद्भावे चैत्रस्य शरीरादिकं चैत्रस्य विशेषगुणजन्यं कार्यत्वे सति चैत्रस्य भोगहेतुत्वात् चैत्रप्रय
त्नजन्यकुसुमपर्यंकादिवदित्यनुमानं मानं लाघवमनुसृत्य बुद्ध्याद्यष्टानामिदानीं युगपद्वाक्यं
दर्शयति बुद्ध्याद्यष्टावात्ममात्रविशेषगुणाः बुद्ध्यादिप्रयत्नान्ता नित्या अनित्याश्च नित्या ईश्वरस्या
नित्या जीवस्य अत्र मात्रपदमवधारणार्थं इत्यधर्मनिरूपणं संस्कारस्त्रिविधः वेगो भावना स्थि
तिस्थापकश्चेति सामान्यगुणात्मविशेषगुणोभयवृत्ति गुणत्वव्याप्यजातिमान् संस्कारः द्वितीयपतना
समवायिकारणं वेगः स द्विविधः कर्मजो वेगजश्च तत्राद्यो नोद्यादककर्मजन्यः शरादौ प्रसिद्धः नोदरे
वेगवत्कपालजन्यघटे द्वितीयः तस्य कपालवेगजन्यत्वात् आश्रयमाह वेगः पृथिव्यादिचतुष्ट

५१

यमनोवृत्तिः भावनांलक्षयति अनुभवजन्यास्मृतिहेतुर्भावना आत्मादिवारणाय प्रथमदलं अ
नुभवध्वंसवारणाय द्वितीयदलं अत्रानुभवउपेक्षात्मकोन्योग्राह्यः इदंतुबोध्यं उद्बुद्धसंस्कार
एवस्मृतिजनकः उद्बोधकंचचिंतादिकंतदुक्तं सदृशादृष्टचिंताद्याः स्मृतिबीजस्यकाबो
धकाइतितत्रनव्याः संस्कारंप्रतिस्मरणमपिकारणं आप्रत्यमाह आत्ममात्रवृत्तिः स्थि
तिस्थापकंनिरूपयति अन्यथाकृतस्यपुनस्तदवस्थापकः स्थितिस्थापकः पृथ्वीमात्र
समवेतसमवेतसंस्कारत्वव्याप्यजातिमत्वं तल्लक्षणंबोध्यं आप्रत्यमाह कटादिपृथ्वी
वीवृत्तिः आदिनाकार्मुकः परिग्रहः इतिसंस्कारः अथगुणानांसाधर्म्यवैधर्म्यप्राक्
या गुणलक्षणंतुप्रागभिहितमेवरूपादिचतुष्टयसांसिद्धिकद्रवत्वस्नेहादिदशभावनानांवि
शेषगुणत्वं तच्चपृथ्वीसमवेतसमवेततद्वीन्द्रियग्राह्यसांसिद्धिकद्रवत्वभावनान्य
त्वविशिष्टगुणत्वापरजात्यनाधिकरणत्वेसतिगुरुत्वान्यगुणत्वं संख्याद्यष्टनैमित्तिक
द्रवत्वस्थितिस्थापकवेगानांसामान्यगुणत्वं रूपादिचतुष्टयपरत्वापरत्वद्रवत्वस्नेहवेगा
नांमूर्तवृत्तिगुणत्वं शब्दादिदशभावनानाममूर्तवृत्तिगुणत्वं संख्यादिपंचानांमूर्तामू
र्तोभयवृत्तिगुणत्वं एकत्वभिन्नसंख्याकपृथक्त्वभिन्नपृथक्त्वसंयोगविभागानामनेकवृत्तिगुण

का

सि

त॰ दी॰
५२

तदन्येषां गुणानामेकैकवृत्तिगुणत्वं रूपादिचतुष्टयशब्दानां वाह्यैकैकेन्द्रियग्राह्यगुणत्वं २

त्वं संख्यादिसप्तकद्रवत्वस्नेहवेगानां द्वींद्रियग्राह्यगुणत्वं बुद्ध्यादिषण्णामंतरेंद्रियग्राह्यगुणत्वं गु
रुत्वधर्माधर्मस्थितिस्थापकभावनानामतींद्रियगुणत्वं अपाकजमेव रूपादिचतुष्टयमप्र
मपरिमाणैकपृथक्त्वगुरुत्वसांसिद्धिकद्रवत्वस्नेहवेगस्थितिस्थापकानां कार
णगुणपूर्वकत्वं जन्यद्रव्यावृत्तिविशेषगुणानामकारणगुणपूर्वकत्वं संयोगविभागवेगा
नां कर्माऽसमवायिकारणकत्वं कारणगुणासमवायिकारणत्वं च संयोगविभागशब्दादृष्ट
भावनानामव्याप्यवृत्तिगुणत्वं बुद्धीच्छाप्रयत्नद्वेषभावनानामविषयत्वं गंधसंयोगादि
चतुष्टयशब्दसुखदुःखेच्छाद्वेषधर्माधर्मसंस्काराणामनित्यगुणत्वं तदितरगुणानां नि
त्यगुणत्वं वैधर्म्यपूर्ववद्बोध्यं इति गुणसाधर्म्यवैधर्म्यं कर्मप्रापककर्मणः स्वरूपमाह च
लनात्मकं कर्म तल्लक्षणमुदीरितमेव प्राक् उत्क्षेपणं लक्षयति ऊर्द्ध्वदेशसंयोगहेतुरुत्क्षे
पणं अधोदेशसंयोगहेतुरपक्षेपणं शरीरसन्निकृष्टसंयोगहेतुराकुंचनं विप्रकृष्ट
संयोगहेतुः प्रसारणं अन्यद्गमनं ऊर्द्धदेशस्यहेतुत्वेन यः संयोगस्तस्यासमवायिकार
णमुत्क्षेपणमित्यर्थः एवमग्रेऽपि ननु भ्रमणादीनामतिरिक्तत्वेन कुतो नोक्तमित्यत आ
ह अन्यत्सर्वं गमनमिति इति कर्मनिरूपणं सामान्यं निरूपयति नित्यमेकमनेकानुगतं

५२

सामान्यस्याश्रयमाह द्रव्यगुणकर्मवृत्तीति तद्द्विविधं परमपरं च परं सत्ता अपरं द्रव्यत्वादि इति सा
मान्यनि० विशेषं निरूपयति नित्यद्रव्यवृत्तयो व्यावर्त्तका विशेषा व्यावर्त्तकाः स्वतो व्यावर्त्तका इत्यर्थः
इति विशेषनि० समवायं निरूपयति नित्यसंबंधः स्थानमाह अयुतसिद्धवृत्तिः ननु युतसिद्धपदेन किं गृ
ह्यमत आह ययोर्मध्ये एकमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ उक्तं च तावेवायुतसिद्धौ द्वौ विज्ञा
तव्यौ ययोर्द्वयोः अविनश्यदेकं पराश्रितमेवावतिष्ठते इति कपालघटयोर्मध्ये एको घटोऽविनश्य
न्नपरं कपालमाश्रित एवावतिष्ठते ऽतस्तावयुतसिद्धावित्यर्थः विनश्यदवस्थस्यापनाश्रितत्वे
नायुतसिद्धत्वं न स्यात् अत उक्तमविनश्यदिति उदाहरति अवयवावयविनौ गुणगुणिनौ क्रियाक्रिया
वन्तौ जातिव्यक्ती वि[illegible]शेषनित्यद्रव्ये चेति इति समवायनि० प्रागभावं लक्षयति अनादिः सान्तः प्रागभाव
घटादिकारणाय प्रथमदलं परमाणुवारणाय द्वितीयदलं ननु प्रागभावः कस्मिन्कालेऽस्तीत्यत आह उत्प
त्तेः पूर्वं कार्यस्य कार्यस्योत्पत्तेः प्राक् स्वप्रतियोगिसमवायिकारण एव वर्तते इत्यर्थः अयं प्रागभावः कथं
सिद्ध्यतीति चेत्तत्सामग्र्यामुत्पन्नस्य पुनरुत्पत्तिः स्याद्ध्वंसं न तत्सिद्धिः इह कपाले घटो भविष्य
तीति प्रतीतिरेव प्रमाणं इति प्रागभावं. ध्वंसं लक्षयति सादिरनन्तः प्रध्वंसः उ[illegible] उत्पत्त्यनन्तरं कार्यस्य कार्य
स्योत्पत्त्यनन्तरं स्वप्रतियोगिसमवायिकारणे वर्त्तत इत्यर्थः स च [illegible] घ[illegible]ध्वंस इति प्रत्ययविषय इति ध्वं

प

सः अत्यंताभावं लक्षयति त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यंताभाव इत्यर्थः विशेषं
निरूपयति ध्वंसप्रागभाववारणाय त्रैकालिकेति भेदवारणाय संसर्गेत्यादि उदाहरंति यथा भूतले
घटो नास्तीति सहि द्विविध एकपर्य्याप्तधर्मावच्छिन्नप्रतियोगिताको नेकपर्य्याप्तधर्मावच्छिन्नप्रतियो
गिताकश्च तत्राद्यो धर्मो घटत्वादिः द्वितीय उभयत्वादिः अयमेव व्यासज्यवृत्तिधर्म इत्युच्यते स
च व्यापिकाभावेनानुक्रियते घटवति भूतले घटाभावस्य सत्वे विसामग्र्यभावे प्रतीत्यभावः नन
सा च सामग्री भूतले घटसंयोगप्रागभावध्वंसान्यतरता दृशप्रतीतिकालीनभूतलत्वादिकं च प्रति
योगितावच्छेदके येपि एकप्रतियोगिकानां तेषां संसर्गभेदेन बहुत्वे विशेष्याभावसमुदाया
त्सामान्याभावो अतिरिक्त एव अनवस्थाप्रसाद्ध्रसेन द्वितीयाभावो भावस्वरूप एवेति संप्रदायवि
दभावसन्निधधर्मुस्वप्रमाणागम्यत्वासंभवेन तृतीयाभावः प्रथमाभावस्वरूप इति नवीनाः इत्यास्तां
त्र॰ विस्तरः इत्यंताभावं अन्योन्याभावं लक्षयति तादात्म्यावच्छिन्नप्रतियोगिताको भावो अन्योन्याभा
वः यथा घटः पटो न भवतीति इत्यंताभावग्रंथ अथ प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांता
वयवतर्कनिर्णयवादजल्पवितंडाहेत्वाभासछलजातिनिग्रहस्थानानां तत्वज्ञानान्निःश्रे
यसाधिगम इति न्यायस्यप्रथमसूत्रे षोडशपदार्थानां प्रतिपादितत्वात्कथं सप्तपदार्था एवेति

रूपिता अत एवाह सर्वेषामपि पदार्थानां यथायथमुक्तेष्वन्तर्भावात् षडेव पदार्था इति सिद्धं तथा च तेषां
साक्षान्मोक्षोपयोगित्वेन तेषां विभागः रत्नाकरेपि प्रतिपादितत्वादि भावः कस्य कस्मिन्नन्तर्भावः प्रमाणां द्रव्य
गुणयोरन्तर्भावः आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेय
मिति सूत्रे तत्र प्रथमानां त्रयाणां द्रव्ये चाक्षुषादिविषयरूपादि च अर्थानां गुणे बुद्धेर्गुणे मनसो द्रव्ये ध
र्माधर्मात्मकप्रवृत्तेर्गुणे रागद्वेषमोहात्मकदोषस्य गुणे प्रेत्यभावो मरणानन्तरं जन्म मरणं च चरम
शरीरप्राणसंयोगध्वंसः आद्यशरीरप्राणसंयोगो जन्म तथा च मरणान्तरं तादृशसंयोगरूप
स्य तस्य गुणे सुखदुःखसंवेदनात्मके फलं गुणे दुःखस्य गुणे अपवर्गस्याभावे स च दुःखध्वं
मः सस्वरूपः संशयस्य गुणे साध्यतया कामनाविषयप्रयोजनस्य यथायथं द्रव्यादौ महानसादि दृष्टांत
स्य यथायथं द्रव्यादौ प्रामाणिकत्वेनाभ्युपगतार्थः सिद्धान्तस्य यथायथं द्रव्यादौ प्रतिज्ञाद्यवयव
स्य गुणे विजिगीषुकथा जल्पस्य गुणे स्वपक्षस्थापनाहीनकथा वितण्डा तस्य गुणे हेत्वाभासा
नां यथायथं द्रव्यादौ अभिप्रायान्तरेण प्रयुक्तस्य [illegible] र्थान्तरं परिकल्प्य दूषणाभिधानं छलं तस्य
गुणे असदुत्तरं जातिस्तस्या गुणे पराजयहेतुर्निग्रहस्थानं तच्च प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रति
ज्ञाविरोधः प्रतिज्ञासंन्यासः हेत्वन्तरमर्थान्तरं निरर्थकमपार्थकमप्राप्तकालं न्यूनमधिकं पुन

तर्कस्य गुणे नि
र्णयस्य गुणे त
त्वबुभुत्सोः क
थावादस्मर
णे ४

५४

रुक्तौ मननुभाषणे नैर्न्नैर्मनप्रतिभासमतानुक्तावि शेषयेत्पः यथानुयोज्योपेक्षणं निरनुयोज्यानुयो
गः अपसिद्धांतो हेत्वाभासश्चेति बहुविधा एषां षष्ठा पदार्थं इत्यादौ ननु मालिन्यत्वे वह्निर्जीवो दाहानु
त्पादाद्द्रूह्या वं स्याप्रावृत्तिर रतिरिक्तैवेति चेन्न उत्तेजकाभावविशिष्ट मन्यभावस्यापि दाहकार
णत्वेन तस्याभानाभावात् सादृश्यमपि न पदार्थान्तरं सापि तु तद्भिन्नत्वे सति तद्गतभूयोधर्मव
त्वं प्रबुद्धिपिनातिरिक्ता किंतु भस्मादिसंयोगध्वंस इति तद्दोष इति पदार्थानामंतर्भावः पदा
र्थज्ञानस्य परमप्रयोजनं मोक्षस्त्वामनन्ति स च स्वर्गादिरिति मीमांसकाः नित्यसुखाभिव्य
क्तिरिति तदेकदेशिनः अहंकारनिवृत्तौ स्वस्वरूपतावगम इति वेदांतिनः सारूप्यसालोक्य
सामीप्यं सायुज्यभेदाच्चतुर्विधः इति सगुणोपासकाः अपराधीनतेति चार्वाकाः उर्ध्व
गतिरित्यपि केचित् तत्सर्वं धीमता तत् चिंतनीयं अपि तु आत्यंतिकैकविंशति दुःखध्वंसः
आत्यंतिकत्वं च स्वसमानाधिकरण दुःखप्रागभावासमानकालीनत्वं एकविंशति दुःखानि
च शरीरं षडिंद्रियाणि षड्विषयाः षड्बुद्धयः सुखं दुःखं चेति दुःखानुषंगित्वात् शरीरादौ गौ
णदुःखत्वं तथा चात्मा वारे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यः इति श्रुतेरात्मा

औदासीन्यमिति सांख्याः ... शकस्य जीवस्य दुविद्याप्रभवत्रिम्यि स्थाननिरत्तौ

नसाधननिदिध्यासनसाधनं मननसाधनत्वं पदार्थज्ञानेनसंजायतेइति एवंसतितत्त्वज्ञानेजातिशरी
रघ्वादावात्मत्वाभिमानरूपमिथ्याज्ञानस्यनाशः तेनदोषाभावः तेनप्रवृत्त्यनुत्पत्तिः तत
स्तत्कालीनशरीरेणकायव्यूहेनवाभोगतत्त्वज्ञानाभ्यासात्प्रारब्धकर्मणोनाशः ततोजन्माभावः ततोमोक्ष
इतिक्रमः नित्यनैमित्तिकैरेवकुर्वाणोदुरितक्षयं ज्ञानंचविमलीकुर्वन्नभ्यासेनचपाचयेत् अ
भ्यासात्पक्वविज्ञानःकैवल्यंलभतेनरइत्यादिवचनात् तमेवविदित्वातिमृत्युमेतिनान्यःपंथावि
द्यतेअयनायेतिश्रुतेश्च सगुणोपासनाकाशीमरणादेरपितत्त्वज्ञानद्वारामुक्तिहेतुत्वं[illegible]
वपरमेश्वरःकाश्यांतारकमुपदिशतीतिसारम् इतिमोक्षनिरूपणं इतिश्रीसिद्धांतचन्द्रो
दयनामकं तर्कसंग्रहविवरणंसमाप्तम् मंगलंलेखकानांचपाठकानांचमंगलम् मंगलंस
र्वराज्ञानांप्रजानांसर्वत्रमंगलम् यादृशंपुस्तकंदृष्ट्वातादृशंलिखितंमया यदिशुद्धमशुद्धंवामम
दोषोनदीयते १ लिखितंस्वरूपलालेनस्वपठनार्थम् संवत् १८[illegible] मिति ० ० ० ०